1258

409/1995

अथदन्नाकुमारचारंभः॥ग्रंथ ३३००

ॐ नमः श्रीगणेशाय नमः॥ सर्वकामप्रदामिष्टदेवतां भुवनेश्वरीं॥ प्रणम्य परयाभक्त्या गणानामधिपं तथा॥१॥ गोपनाथो
द्विजाधीशः सतां कौतुककृते नवं॥ दशनां च कुमाराणां संशोधयति सत्कथां॥२॥ अस्ति पुष्पपुरं नाम मगधेषु महत्पुरं॥ महे
न्द्रनगरी सारमादायेव विनिर्मितं॥३॥ तत्रासीत् निर्जितारातीराजहंसाह्वयो नृपः॥ राजराजानमन्मौलिमाला र्चितपदद्वयः ४
अभूद्राज्ञी वसुमती तस्य भूमिपतेः प्रिया॥ कमला केशवस्येव शिवस्य च शिवा यथा॥५॥ मन्त्री शर्मा धर्मपालः पद्मोद्भवश्च निश्च
याः॥ आसन् मंत्रिवरास्तस्य काव्यवाचस्पतिप्रभाः॥६॥ सुमतिः सत्यशर्म्मेति तनयद्वितयं शुभं॥ बभूव तेषु सचिवश्रेष्ठस्य
मतिशर्म्मणः॥७॥ कामपालः सुमित्रश्चेत्यासीन्नाम्नासुतद्वयं॥ धर्मपालस्य सकलनीतिशास्त्रोल्लसन्मतेः॥८॥ अथः पु
त्रोद्भवस्यापि बभूवतुस्तनयाः शुभाः॥ सुमंत्रः सुश्रुतश्चेति नित्यारत्नोद्भवाभिधः॥९॥ सर्वेषु मंत्रिपुत्रेषु तनयो मतिशर्मणः
सत्यशर्म्मा विरक्तः संस्तीर्थसेवापरोभवत्॥१०॥ धर्मपालात्मजः कामपालो बभ्राम भूतले॥ पद्मोद्भवस्यापि सुतो र
त्नोद्भव इति श्रुतः॥११॥ वाणिज्यार्थं गतो नौभिर्वसुपूर्णाभिरर्णवं॥ शेषाः सिषेविरे राजहंसं सचिवे‒ ‒श्वरः॥१२॥ तस्य
वीथिसीमांतवसुधैकप्रमोरतिः॥ बभूव राजहंसस्य प्रतिबंधः सुसंततेः॥१३॥ तत श्चिंतासमाक्रांतहृदयः समहीपतिः॥ आ
हूयोवाच दैवज्ञानखिलान् विनयानतः॥१४॥ स्वयं शास्त्रकृताभ्यासाद्देवतोपासनादपि॥ भूतं भवद्भविष्यच्च सर्वं जानीथ तत्त्व
तः॥१५॥ ततोहं परिपृच्छामि प्रश्नमेकं मनःस्थितं॥ संततिप्रतिबंधघ्नैः कृतैः पुण्यशतैरपि॥१६॥ न जायते संततिर्मे कारणं वि
द्यते त्र किं॥ ततो विज्ञायते सर्वे तत्प्रतीघातकारणं॥१७॥ हृष्टाः प्रोचुर्महीपालमुपायं संततिप्रदं॥ राजन्नित्यं सपत्नीकः समा
राधय केशवं॥१८॥ तस्य प्रसादात्संतत्यां संततिस्ते भविष्यति॥ ततस्तैरुपदिष्टेन श्रीशुभे नियमतत्परः॥१९॥ समारेभे सपत्नीकः
सपर्यां केशवस्य सः॥ इत्थं समाराधयतः प्रत्यहं तस्य भूपतेः॥२०॥ समत्रिगुणितान्यासन् दिनानि फलकांक्षिणः॥ ततोन्येद्युर्नि
शाशेषे प्येत्य कश्चिद्द्विजोत्तमः॥२१॥ वसुमत्यै ददौ स्वप्ने दिव्यं फलमनुत्तमं॥ ततः सा सहसोत्थाय निशांतास्मृतिवाह्यच॥२२॥

411
1993

मातः सर्वं निशावृत्तं कथयामास भूपतेः॥ स्वामिन्द्विजोत्तमेनाद्य कृपया स्वप्नेन केनचित्॥२३॥ पाश्चात्यरजनीयामे मह्यं दत्तमिदं फलं
तदास्य राजहंसः स निश्चिकाय निहर्षितः॥२४॥ यतः श्रीकेशवेनैव कृतो मे तु ग्रहो महान्॥ अतो मह्यं चिरादेव सत्पुत्रः संभविष्य
ति॥२५॥ अथ स्वल्पैर्दिनैरेव गर्भं वसुमती दधौ॥ श्रुत्वा नदति संतोषाद्राजहंसो भूभुजा॥२६॥ तस्मिन्संवत्सरे यात्रानकृता निम
तान्यति॥ अत्रांतरे मालवेशः कश्चित्सांमलभूपतिः॥२७॥ मानसार इति ख्यातः प्रत्यब्दं तेन निर्जितः॥ अस्मिन्संवत्सरे यात्रां
राजहंसो महीपतिः॥२८॥ न करिष्यति संतोषात्संततिप्राप्तिसंभवात्॥ इति निश्चित्य चित्तेन तत्राजयकांक्षया॥२९॥ आरा
धयामास महाकालमेकाग्रचेतसा॥ तस्य भक्तिं दृढां वीक्ष्य संतुष्टः प्राह भूमिपं॥३०॥ राजन् शक्तिं गृहाणेमाममोघां विजय
प्रदां॥ गृहीत्वा तां ततः शक्तिं मानसारो महीपतिः॥३१॥ राजहंसपराजेतुं ययौ पुष्पपुरं प्रति॥ तमायांतं समाकर्ण्य लब्धशक्तिं
महेश्वरात्॥३२॥ नूनं पराजयो युद्धे मानसाराद्भविष्यति॥ ममेति निश्चयं चित्ते कृत्वापि मगधाधिपः॥३३॥ मानी शूरतया युद्धोत्क
ण्ठा रसी युद्धोद्यमान्॥ ततः समं न्यस सचिवैः स्वलकलभयुतां प्रियां॥३४॥ विंध्यकाननसंकेतं निनाय्यात्मजैः सह॥ स्वयं च सेनाम
दाय राजहंसः प्रतापवान्॥३५॥ मानसारेण युद्धाय निरगात्सचिवान्वितः॥ ततो भूत्माल्ववाधीशमगधाधीशयोर्महान्॥३६
मिथोभिमिलितयोर्मार्गे रणः प्रबलरोषयोः॥ एवं प्रवृत्ते संग्रामे जिनप्रायो यदाभवत्॥३७॥ मगधानात्मधीरेन मालवानाम धी
श्वरः॥ तदालब्धा महाकालाच्छक्तिः संप्रेषिता रणे॥३८॥ मानसारेण विविधैर्मुद्गरास्त्रैः सवारिता॥ शक्तिप्रभावात्सास्तं हत्वा स्
पममूर्च्छयत्॥३९॥ ततः सस्मृतरहितः स्यंदनो जवनैर्हयैः॥ दूरं भुवोतरं नीतः सक्तो भूद्धनशाखिनि॥४०॥ विंध्याद्रिविपिनोद्देशे त
स्मिन्सुराचारितासा प्रिया॥ ततो निजेवल्लक्ष्याणैकां दिशी काश्रमं श्रिणः॥४१॥ अवशिष्टायुधादेवात् विशिशु विंध्यकानने॥ तत्र स
जनमासाद्य सचिवाः स्वपराजयं॥४२॥ राज्ञे निवेदयामासुर्नृपते श्चाशिरश्च्युतो॥ तन् तामूर्च्छितां देवीं सुसमलता सुबोध्यता॥४३
युक्तिभिर्निर्धनो द्योगान्मंत्रिणो निरवर्त्तयन्॥ ततो वसुमती देवी वंचयित्वा खिलं जनं॥४४॥ तस्मिन्दिने निशीथिन्यां निद्रयाप्य

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

द॰कु॰
२

कुलेजने॥ निजप्राणोयथानाथत्वरितोदैवयोगतः॥४५॥ यथैतत्रैवयत्रास्तिराजहंसोमहीपतिः॥ विसस्ततरुसंसक्त
रथसंस्थोतिदुःखितः॥४६॥ तत्रवृक्षाश्रितलतापाशाबद्धगलाब्रवीत्॥ आदित्यस्योदयेजातेसाक्षीभूत्वादिवाकरं
४७॥ प्रमीतप्राणनाथायगमनंप्रतिदेवता॥ योषिद्भिर्ध्याह्यधिवदितिप्रोक्तंमहर्षिभिः॥४८॥ स्मृतिशास्त्रेषुसर्वेषुपुरा
णेष्वागमेषुच॥ परमापन्नसत्वत्वाद्भृत्यवर्गानुरोधतः॥४९॥ मयानकर्तुंतच्छक्यंसंजातेतपनोदये॥ इदानींतत्रयोरेवमम्भा
स्त्युर्तोर्हितोरविः॥५०॥ नूनमस्तमनंतस्यविद्यतेनकदाचन॥ तस्मात्सयत्रकुत्रापिवर्ततेविहितोदयः॥५१॥ तत्ररूप
वमेसाक्षीभूयादनुगमोद्यमे॥ राजहंसस्यचरणाववाराधनमोयदि॥५२॥ मतावनन्यभावेनजन्मप्रभृतिमेहदि॥ ज
न्मांतरेपिमेभर्ताराजहंसोभवत्विति॥५३॥ तत्क्षणोदितशीतांशुकरस्पर्शोभवेततः॥ तच्छ्रुत्वासाहसंदेविमाकुर्वि
त्यभ्यधान्नृपः॥५४॥ ततस्तंभर्तृसदृशस्वरंश्रुत्वातिविस्मिता॥ उवाचास्मिन्वनेकोयंनिशीथेतमसावृते॥५५॥ वि
घ्नमिच्छतिकर्तुंमेकांतानुमृतिसाहसे॥ नैनादृशान्निवर्तिष्येसाहसात्कथयप्रभुं॥५६॥ इत्युक्त्वासावसुमतीलता
पाशंगलेस्थितां॥ दृढीकर्तुंसमारेभेपुनर्दृढविनिश्चया॥५७॥ तांदृष्ट्वापुनरुद्युक्तांमरणायमहीपतिः॥ उवाचसा
हसंदेविपुनःकर्तुंकिमुद्यता॥५८॥ नत्वहंराजहंसस्तेपतिःपुष्पपुराधिपः॥ अत्रास्मितरुसंसक्तरथस्थोतीवदुःखि
तः॥५९॥ तच्छ्रुत्वासालतापाशंविसृज्यसहसागता॥ आगमत्तत्र — — — राजहंसोमहीपतिः॥६०॥ ददर्शतंतथा
वस्थंततःप्राहसापतिं॥ स्थीयतेदुःखितेनैवंस्वामिन्नेकाकिनात्रकिं॥६१॥ इत्युक्तःसनृपःप्राहविलंबंदेविमाकु
रु॥ शीघ्रंगत्वासमानीयसचिवान्स्वनिवेशनात्॥६२॥ इतोनिःसार्यमांयत्नात्प्रया स्वंनिकेतनं॥ ततस्तेकथयि
ष्यामिस्ववृत्तांतमशेषतः॥६३॥ इतिश्रुत्वावसुमतीहृष्टापत्युःसमागमात्॥ यावत्प्रचलितामात्यान्स्वानानेतुंत्वरा
न्विता॥६४॥ मार्गादूरेवमिलितास्तेनावत्तामवेक्षितुं॥ आगच्छंतःपदैराज्ञीप्रज्वलद्दीपिकाकराः॥६५॥ ततस्तस २

413/1995

यथावृत्तंतद्वृत्तांतंनिवेदितं॥ तेषांततस्तेनच्छ्रुत्वासर्वेप्यानिहर्षिताः॥६६॥ शइयासहतमुद्देशंययुर्यत्रास्तिभूपतिः
तेतत्रदृष्ट्वातंभूपंदुःस्थितंदुःखिताःपरं॥६७॥ आरोप्यशिबिकांतस्माद्वृक्षसंकाद्यथोन्नमात्॥ विंध्यकाननसंकेतंनप
निस्मदानैःशनैः॥६८॥ ततोमंत्रौषधैःस्वस्थःसंजातःप्रभुरब्रवीत्॥ मानसारस्यतत्सैन्यंजितंतत्सैनिकैःक्षणात्॥
६९॥ एकाकिनाततस्तेनशक्तिर्मोहेस्मरीरणे॥ विमुक्तामोसमादिश्यज्वलत्कालानलप्रभा॥७०॥ सादेवात्सारथिंहत्वा
रथस्थंमाममूर्छयत्॥ ततःकिंतत्रसमभूदितितोवेम्भिमूर्छितः॥७१॥ इदानीमास्मैवेतन्यःस्वस्थीभूतोस्मिपूर्ववत्॥
अतःस्वल्पैरपिहिनैर्मानसारंजेष्यामिसंगरे॥७२॥ ततःसमभ्युसचिवैस्तस्माद्विंध्यवनान्नृपः॥ जगामवामदेवर्षेरा
श्रमंस्वजनैःसह॥७३॥ तदाज्ञानुग्रहात्तत्रनिवसंतास्रमेसुभे॥ दिनानिराजहंसःसंगमयामासकानिचित्॥७४॥
देव्याःपुंसवनादीनिस्थितस्तत्रमहीपतिः॥ कारयामासविधिवद्वामदेवमहर्षिणा॥७५॥ ततःकालेवसुमतीसुषुवे
तनयंशुभं॥ तंदेवतत्रगगनेवागुवाचाशरीरिणा॥७६॥ राजवाहननामायंजित्वारीन्पालयिष्यति॥ अव्याहताज्ञोप
सुधांसर्वांभूपसुतस्तव॥७७॥ ततस्तत्रसमाहूतोवामदेवोमहामुनिः॥ जातकर्मादिकंकर्तुंराजहंसेनभूभुजा॥७८
समागत्याद्भुतंबालंतंदृष्ट्वाभाग्यवानयं॥ भविष्यतिनसंदेहःप्राहराजन्सुतस्तव॥७९॥ ततस्तत्पूर्ववृत्तांतंकथयामा
सपार्थिवं॥ सभार्यःसूष्णतनयःकस्यचित्सरसोतटे॥८०॥ कुर्वन्मुदाजलक्रीडांसांबःकौतूहलान्वितः॥ कस्यचित्क
लहंसस्यक्रीडतःप्रिययासह॥८१॥ मुहूर्तमात्रंचरणौवबंधविरतंतुना॥ तदानीमेवहंसःसमुनिर्भर्त्सयाशशापतं॥
८२॥ त्वमेवंम्रंरवल्लावरुःप्रियापार्श्वेनजन्मनि॥ भविष्यस्यचिरादेवस्वरूनाविनयान्नृप॥८३॥ ततस्तंशापमाकर्ण्य
प्रत्यादपिसुदारुणं॥ सांबःसविनयंशीघ्रमानम्यमुनिमब्रवीत्॥८४॥ स्वामिन्मयातेविहितमज्ञानात्पादबंधनं॥
क्षमस्वकरुणांभोधेजहीहिक्रोधमूर्छितं॥८५॥ इत्युक्त्वादंडवत्तस्यचरणाग्रेलुलो—सः॥ तथावस्थंततोदृष्ट्वासांबंगो

द०कु०

३

विंदनंदनं॥८६॥ अनुजग्राहकरुणापूर्णांतःकरणोमुनिः॥कालत्रयेपिमेवाक्यमेतद्भवतिनान्यथा॥८७॥परमल्पतरं
कालंभुक्त्वाशापंसुदारुणं॥लंहृदान्निगडान्मुक्तःप्राज्यंराज्यमवाप्स्यसि॥८८॥पश्चाद्विद्याधराधीशोभवितेत्युक्त्वा लब्धं
दत्ताशिषिमुनौयातेनथासर्वेमुदंययुः॥८९॥मित्रगुप्तःसुमित्रस्यप्रमितिःसुमानःसुतः॥मंत्रगुप्तःसुमंत्रस्यविश्रुतः
सुश्रुतस्यच॥९०॥इत्येषांमंत्रिणांजातास्तदानीमेवसूनवः॥सामाद्युपायाश्चत्वारोमूर्त्ताइवचकाशिरे॥९१॥ततस्ता
न्निजपुत्रस्यसाहाय्यार्थंमहीपतिः॥पुत्रत्वेपालयामासजातमात्रान्स्वतेजसः॥९२॥अतोन्यानपिपुत्रत्वेपालयाम्य
हमर्भकान्॥कुतोप्यत्रसमानीतान्मनिमित्यकरोन्नृपः॥९३॥अथांतरेमुनिःकश्चित्समागत्यमहीभुजे॥समर्प्यबाल
कंकंचित्कथयामासतत्कथां॥९४॥सखाप्रहारवर्मातेदेव्याःपुंसवनादिकं॥इष्टुंसांतःपुरःपुष्पपुरंप्रतिसमागमत्॥
९५॥शीघ्रमागच्छतस्तस्यपथिकश्चिद्द्विजोत्तमः॥मिलितःकथयामासत्वद्वृत्तांतमशेषतः॥९६॥राजन्नृसराजहंस
स्तेप्राणेभ्योप्यधिकःसखा॥शिवप्रसादसंप्राप्तवरलब्धमहौजसा॥९७॥बद्धशोनिर्जितेनापिमानसारेणतज्जि
तः॥सांतःपुरःसहामात्यःसंभृत्यबलवाहनः॥९८॥तज्ज्ञायतेगतःक्वापिसांप्रतंसदुःखितः॥सत्पुरुषाद्धिभग्न
स्यतवतुल्कंभनामिति॥९९॥आकर्ण्यमिथिलाधीशोनिवृत्तःस्वंपुरंप्रति॥किरातहृतसर्वस्वोगच्छन्दैवाद्भूमिनि
१००॥तथाविधस्यत्वरयागच्छतःखिन्नचेतसः॥जातमात्रःसुतोमार्गेपतितोनत्ववीक्षितः॥१॥तस्मिन्नेवक्षणेपुष्प
ग्राहर्तुंनिर्गतःपथि॥रुदंतमद्रुमद्राक्षंतंबालंगोमयावृतं॥२॥ततउद्धृत्यविज्ञानबलाद्वांगिकलक्षणैः॥प्रहारवर्म
णःपुत्रंविज्ञायातिमनोरमं॥३॥त्वत्सकाशंमयानीतंगृहाणेतंमहीपते॥इत्युक्त्वातंप्रदायास्मैप्रययौसयथागतं॥४॥
ततःप्रगृह्यतंबालंसादरात्पृथिवीपतिः॥कृत्वापहारवर्माख्यंवसुमत्यैप्रदत्तवान्॥५॥अथैकदासमागत्यभिल्ले
शःकश्चिदर्भकं॥राज्ञेनिवेदयामासवृत्तमस्याप्यवीकथत्॥६॥मैथिलेमहतंप्राप्तेपलायनपरायणे॥स्वामिन्नेकेना २

415
1795

पि नतत्पुत्रःपथिगच्छता॥७॥धात्रीक्रोडात्समा त्ससमानीयममार्पितः॥मयाथाप्रसमानीतस्त्वत्समर्प्यणहेतवे॥८॥त
स्माद्गृहाणराजेंद्र मविशंकितः॥इत्युक्त्वाराजहंसायतंददौसवनपतिः॥९॥तस्योपहारवर्माख्यांविदधेविधिपूर्वकं
कदाचिद्राजहंसायमुनिःकोपिसमागतः॥१०॥कंचित्कुमारकंदत्वातद्वृत्तांतमभाषत॥आगतेऽ थारामयतीर्थाद
स्मिन्निकाचन॥११॥रुदतीमार्भकाद्दृष्ट्वापृष्टावृष्टस्वचेष्टितं॥मगधाधीश्वरामात्यपुत्रोरत्नोद्भवाभिधः॥१२॥पोतेनार्थार्जकः
कालयवनद्वीपमागतः॥श्रेष्ठिनःकालगुप्तस्यसुवृत्तांतत्रकन्यकां॥१३॥विवाह्यव्यवहारेणबद्धकथैर्लब्धवानसौ॥तस्मिन्
स्वपितरौद्रष्टुंप्रत्यावृत्तेमहार्णवे॥१४॥पोतेचविधिनाभग्नेययुःसर्वेविशीर्णतां॥सुवृत्तागर्भिणीतस्यपत्नीमासुधुतनी
तदा॥१५॥कंचित्फलकमालंब्यभाग्येनाहमतारयं॥ततोमयाभर्तृजन्मभूमिंप्रतिशनैःशनैः॥१६॥नीयमानाचविं
ध्याद्रिवनेसुतमसूतसा॥प्रसवव्यथयातत्रगुल्मेलुठत्यचेतना॥१७॥ततोहंबलमादायचिंतेतुंमार्गमागता॥अहं
तद्धात्रिकास्मीतिब्रुवाणेवागतेगजे॥१८॥आधावद्बालकंत्यक्त्वागूढाहंचा वेक्षदा॥गजस्ततःशिशुंनीत्वाकरेणो
मक्षिप्सत्॥१९॥तत्क्षणानुगतंसिंहंदृष्ट्वावन्यगजोभजत्॥पततंगगनाद्बालमेनशाखास्खलितःकपिः॥२०॥गृहीतो
फुल्लसंप्रेक्ष्यफलंनेतिनमत्यजत्॥ततःसदैवादपतत्साद्रपल्लवसंस्तरे॥२१॥तच्चसर्वंमयादृष्टंनिलीनेनलतांतरे॥अ
थारुंगजंसिंहोनौगतौवीक्ष्ययथागतं॥२२॥लतांतराद्विनिःसृत्यकरुणापूर्णमानसः॥श्वासमात्रावशेषंतंबालमा
दायसत्वरं॥२३॥मध्याह्नेकिंचिद्विरागेस्वाश्रमंसमुपाययौ॥तत्रासीनंसमभ्येत्यवामदेवंप्रणम्यच॥२४॥सर्ववृत्तांत
मावेद्यबालमेनमदर्शयं॥विलोक्यात्मज्ञंतंबालंसमुनिःप्राहमामिति॥२५॥त्वंगत्वाराजहंसायश्रीघ्रमेनंसमर्पय॥त
तोहंवामदेवर्षेर्नियोगाद्भवदंतिकं॥२६॥अनैषमेनंतस्मात्त्वंगृहाणपृथिवीपते॥इत्याख्यायमुनौयातेराजारत्नोद्भवंस्मृत्वा
२७॥शोचन्सुभ्रमेक्षितंबालंचक्रेपुष्पोद्भवाभिधं॥वामदेवमुनेःशिष्यःसोमशर्माकदाचन॥२८॥आहरत्सुरतोराज्ञःक

--रोप्यबालकं॥ कावेरीतीरकुंजेषु क्रंदंतीबालकान्विता॥२९॥ अभ्यभाषतदृष्टैकासेनोरागुउनामया॥ मगधेशप्रधान
स्यनेरहनाम निशर्मणः॥३०॥ देशांतापदमुंसत्यत्राम्भोरव्यस्तीर्थयात्रया॥ समीरस्यरुचिरांकन्यामग्रहारेसकुत्रचित्॥३१॥ का
लीनाम्नीययाम्यापितदनुत्पन्नसंततिः॥ पुनस्तद्भगिनीगौरीमुपयेमेयवीयसीं॥३२॥ तस्यामजीजनत्पुत्रमेनमस्यास्मि
धात्रिका॥ एकदाबालमादायस्नानार्थंदैवनोदिता॥३३॥ महानद्यांसमागच्छमध्यांह्निघर्मपीडिता॥ तत्रागत्यततःकाली
बालेनसहनिर्जने॥३४॥ प्रवाहेणानपि सामामपासरदस्युयिनी॥ आयुःशेषतयारुद्धाहालेनीमजागमं॥३६॥ इत्युक्तासा
बलीशीघ्रंविषव्यालुमनेनना॥ अनुक्रांतविषामंत्रैरभद्दुक्रांतजीविता॥३७॥ + पानस्यानूनदुःखाहंनयंतीबालकंक
चित॥३५॥ उडुपंप्राप्यदष्टाहमभवंतत्रभोगिना॥ + तदुपाख्यानविज्ञायमुपानैषमिमंशिशुं॥ नवांतिकमहाराजगृहाणाद्भु
तनेनसं॥३८॥ ततोगृहीत्वातंबालंविदित्वान्वयमादरात्॥ सोमदत्ताख्ययाख्यातंविदधेवसुधाधिपः॥३९॥ अन्येद्यु
र्दिवसारंभेदेवीवसुमतीविभाः॥ अग्रेकुमारकंकंचित्संनिधायव्यजिज्ञपत्॥४०॥ स्वामिन्नद्यतमस्विन्यांनारीकाचिन्म
माग्रतः॥ आविर्भूयप्रदायैनमवादीदद्भुतांकथां॥४१॥ मणिभद्रस्ययक्षस्यपुत्रीतारावलीत्वहं॥ ततयोधर्मपालस्यका
मपालःपतिर्मम॥४२॥ तस्यसूनुरयंबालःकुबेरादेशतोमया॥ राजवाहनसेवार्थंनिहितोत्रेतिसावदत्॥४३॥ इत्याख्या
यसमर्प्यैनंकामपालसुतंमम॥ अभूदंतर्हिताभर्तृसमीपगमनेच्छया॥४४॥ इत्थंदेव्यावचःश्रुत्वाराजहंसमहीपतिः॥ त
स्यार्थपालइत्याख्यांविदधेविधिवत्तदा॥४५॥ संवर्द्धनंवसुमतीमहिषीप्रियभैस्तद्राजवाहनकुमारकपूर्वमा॥ रा
जाकुमारदशकंस्तनविद्यमुक्तमार्गोपनीतमितयौवनमभ्यरस्सत्॥१४६॥ ॥इतिश्रीमन्महाराजाधिराजश्रीगोपी
नाथसंशोधितेदशकुमारचरितेकथाआरंभोनामप्रथमउल्लासः॥१॥ ॥अथैकदाकुमारैस्तैःसहधात्रीशसेश्वरः॥
वामदेवमदंगत्वामुनींद्रंप्रणनामतं॥१॥ आदरेणोपवेश्येनान्समुनिःप्राहपार्थिवं॥ राजवाहननामायंविहिषःसाध

यिष्यति॥२॥ अवंतिसुंदरींनाममानसारस्यकन्यकां॥ स्वेनैवभुजवीर्येणसंग्रामांपरिणेष्यति॥३॥ ततोदिग्विजयायैषसबलःप्रेष्य
तामिति॥ तथेतिमुनिवाक्यंतत्गृहीत्वामूर्ध्निभूपतिः॥४॥ समंत्र्यसचिवैःसार्द्धंनीतिशास्त्रविशारदैः॥ सुमेक्षिसाधकोदृष्टेसमृत्य
लवाहनं॥५॥ राजवाहननामानंदिग्जयायान्वयोजयत्॥ ततःसपितुरादेशंधृत्वामूर्ध्निप्रणम्यतं॥६॥ पूर्वोपवर्णितैस्तैस्तैःकुमारै
र्नवभिःसह॥ विप्रैर्विहितमंगल्यःप्रतस्थेदिग्जिगीषया॥७॥ ततःप्रचलितोवीरःकुमारोराजवाहनः॥ वामदेवाश्रमंगत्वादृष्ट्वात
मृषिसत्तमं॥८॥ प्रणम्यपरयाभक्त्यादिग्जयाज्ञामयाचत॥ ततःसवामदेवर्षिराशीर्वचनपूर्वकं॥९॥ संतुष्टःप्राहतंराजकुमारं
विनयान्वितं॥ स्वबलेनसप — स्त्वंजित्वासर्वादिशस्तथा॥१०॥ अव्याहताज्ञःकुशलीशीघ्रमेवसमेष्यसि॥ परंत्वयाविधातव्या
शंभवेभक्तिनित्यहं॥११॥ यत्प्रभावेनसर्वत्रविजयंसमवाप्स्यसि॥ इतितस्यमुनेर्वाक्यंसाभिप्रायमुदीरितं॥१२॥ श्रुत्वाकुमा
रोजयाद्रुत्नेननियमंदृढं॥ अस्तुत्वाहूजनंशंभोर्नाहंभोक्ष्येकदाचन॥१३॥ ततस्तमृषिमामंत्र्यवामदेवंमुदान्वितः॥ वैन्यादीसं
स्मरन्मार्गेप्रयाणमकरोत्प्रभुः॥१४॥ गच्छन्पथिमहारण्येस्मृत्वानियममात्मनः॥ विलोकयन्ददर्शासौ — विंध्याद्रिकंदरे॥
१५॥ प्रासादंस्फाटिकंशंभोरभ्रंलिहमद्भुतं॥ तत्समीपस्थितेकुंडेसर्वतीर्थमयोदके॥१६॥ स्नात्वाप्रविश्यप्रासादंकुमारो
भक्तिपूर्वकं॥ पूजयामासतच्छंभोर्लिंगंमुक्तामयंमहत्॥१७॥ ततःप्रासादसौंदर्यंविलोकयितुमद्भुतं॥ यावत्सनयनैरम्यैसंप्रे
क्षयतिसर्वतः॥१८॥ तावत्त — पार्श्वस्थंद्विजमेकंव्यलोकयत्॥ शस्त्रविक्षतसर्वांगंकृशाकारंसुदुःखितं॥१९॥ ततःसप्रच्छ
तंविप्रंकरुणापूर्णमानसः॥ ब्राह्मणकस्त्वंकुतोवस्थासंजातेयंतवानघ॥२०॥ ततःप्रोवाचविप्रस्तंमद्वृत्तांतंयथाविधं॥ नास्ति
यद्यस्यकस्यापिविप्राध्यत्वयेनिवेदितं॥२१॥ तच्छ्रुत्वाराजसूनुस्तंब्राह्मणंप्रत्यभाषत॥ विप्रेंद्रविनयत्किंचित्कार्यंभवतिक
ल्पितं॥२२॥ तन्निश्चयेनवक्तव्यंजनानामग्रतोऽखिलं॥ एवंकदाचिन्मिलतिमानवःकोऽपिकार्यकृत्॥२३॥ निजेच्छयासमाप्य
तोनित्यंभूमंडलंभ्रमन्॥ अथवाकोऽपिनिर्नैत्यपरोपकरणव्रती॥२४॥ किंवदं — समाकर्ण्यकार्यसिद्धिंप्रयच्छति॥ इतितद्वचनं

X2 ४
417/1995

ह॰कु॰
५

श्रुत्वासविप्रोजातनिश्चयः॥२५॥कथयामासवृत्तांतंनिजंराजसुतस्यतत्॥पुराहंशबरैःसार्द्धंसर्वधर्म्मबहिःकृतैः॥२६॥कू
रैश्चौर्य्यरतैर्नित्यंसख्यमाबद्धवान्दृढं॥तैरेवसार्द्धंभक्ष्यादिव्यवहारमहर्निशं॥२७॥कुर्वन्नल्पतरैरेवदिवसैस्तन्मनोभवं
एकदाब्राह्मणःकश्चिच्चिरंपितृगृहेस्थितां॥२८॥नीत्वापत्नींनिजांरम्यांगच्छन्निजगृहंप्रति॥मार्गेहंमिलितस्तेषांशबरा
णांदुरात्मनां॥२९॥ततस्तैःसहसाविप्रःसहतःप्रोद्यतायुधैः॥तंहत्वातस्यभार्य्यांतेविलोक्यतरुणींबलात्॥३०॥कर्तुमारे
भिरेतस्याधर्षणंकाममोहिताः॥ततःसाविह्वलाभीताभयात्तद्धर्षणोद्भवात्॥३१॥किंकरोमिक्वगच्छामीत्येवंचिंतातुरात
दा॥दृष्ट्वामांकंठसंसक्तभ्रस्मसूत्रमवस्थितं॥३२॥रक्षरक्षद्विजश्रेष्ठमामनाथांमहाभयात्॥एवंवदंतीनचिरात्मदंतिकमु
पाययौ॥३३॥ततोमयामहापापकारिणापिनिरंतरं॥ईश्वरानुग्रहोत्पन्नसद्बुद्धिविभवेनते॥३४॥इत्युक्ताःसर्वदास्मा
भिर्दुःकर्म्मैवविधीयते॥परंत्वियंहतधवाब्राह्मणीशरणागता॥३५॥यथेच्छंगच्छतामद्ययूयमाज्ञांमयेच्छया॥इतिप्रोक्ता
अपियदातेनैनांमुंचंतितांतदा॥३६॥भयेत्यजभगिन्येहीत्युक्त्वासारक्षितामया॥संजातमन्यवःसर्वेततस्तेविविधायुधैः॥३७
प्राहरन्समकालंमांसर्वांगेषुयथाबलं॥तैर्हन्यमानःसहसाक्रांतजीवितस्यममायथौ॥३८॥प्राणःप्रयाणसमयेसर्वप्राणिभयंक
रः॥तस्मिन्नोसमयेनेतुंसमागच्छन्भयंकराः॥३९॥कृतांतदूताश्चत्वारःप्रस्फुरत्पाशपाणयः॥यावत्तेममजीवस्याकर्षणंकर्तु
मुद्यताः॥४०॥तावद्विष्णुगणास्तत्रसमेत्यशुभदर्शनाः॥मैनंनयतमुंचंतुनानित्युक्त्वान्यवारयन्॥४१॥ततस्तयोरभूद्यु
द्धमज्जीवंनेतुकामयोः॥क्षणेनयमदूतास्तेवैष्णवैर्निर्जितारणे॥४२॥तद्वृत्तांतंसमाख्यातुंयथावृत्तंयथेप्सितं॥प्रेषया
मासुरचिराद्गणंकंचिद्यमंप्रति॥४३॥सतत्रगत्वातत्सर्वंयत्तस्राज्ञेन्यवेदयत्॥स्वामिन्नद्ययंतवदशाद्विजंतंपापकारि
णं॥४४॥शस्त्रैर्विनिहितंभिल्लैर्नेतुमद्यसमुद्यता॥यावत्तज्जीवमाकृष्यनयामोभवदंतिकं॥४५॥तावद्विष्णुगणा
स्तत्रसमेत्यास्मान्न्यवारयन्॥तत्संदेहंविदित्वेतिकुरुस्वामिन्यथोचितं॥४६॥ततस्तद्वचनात्सर्वंविदित्वाश्चमादितः

वैवस्वतोययौशीघ्रंविष्णुंवैकुंठनायकं॥४७॥सतत्रगत्वागोविंदंप्रणम्येतिव्यजिज्ञपत्॥स्वामिन्नेवंविधाःपापकर्तारश्चैत
मंतिकं॥४८॥समागच्छंतिकिंकृत्यंव्यापारेणमयामुना॥श्रुत्वेतिप्रहसन्नाहविष्णुर्वैवस्वतंप्रति॥४९॥यत्वयोक्तंसदुः
कर्मकारिणामग्रणीर्द्विजः॥तत्तथैवनसंदेहःकश्चिदप्यत्रवर्त्तते॥५०॥तथापिस्त्रीपरित्राणेशरीरंतेनकल्पितं॥ततःपा
पक्षयाज्जातःसोग्रणीःपुण्यकारिणां॥५१॥अद्यप्रभृतिनैवास्यपापंपुण्यंचविद्यते॥एतस्मिन्नेवदेहस्यतस्मादात्मानि
दर्शयतां॥५२॥अतःपरमयंकर्मकरिष्यतियथाविधं॥फलंतथाविधंनूनंभोक्ष्यतेमन्नियोगतः॥५३॥ततःसजीवोदेहे
स्मिन्प्रत्यावृत्त्यव्यवस्थितः॥तत्सर्वमपिवृत्तांतंहस्तामलकवद्भ्रम॥५४॥प्रत्यक्षमेवसंजातंततःसंचिंतितंमया॥शु
भंवाप्यशुभंकर्म्मकरिष्येयद्यतःपरं॥५५॥ततःपुनःकर्मबंधमवाप्स्येहमसंशयं॥तस्मादेवंविधेनैवशरीरेणयदीश्व
रं॥५६॥तोषयामिततःशीघ्रंसिद्धिर्भवतिवांछिता॥इतिनिश्चित्यमनसासंकल्पादहमत्रशकं॥५७॥ईश्वराराधनार्था
यनिष्ठाम्यत्रसमाहितः॥तद्दिनेमध्यरात्रेस्माद्विलात्काचिद्वरांगना॥५८॥एकाकिन्येवनिर्गत्यरूपयौवनशालिनी
ईश्वराराधनंकृत्वागानंनृत्यंततःपरं॥५९॥ततोमुहूर्त्तात्त्वरितःप्रययौसायथागतं॥वासरेस्मिन्भयातस्याःकृतोपैसै
केवलं॥६०॥द्वितीयेपिदिनेसैवतथैवागत्यपूर्ववत्॥कृत्वासर्वंपूजनादिक्षणादंतर्हिताभवत्॥६१॥एवंनित्यंनिशीथे
स्माद्विलान्निःसृत्यसुंदरी॥पूर्ववच्छिवपूजादिकृत्वागच्छत्यदर्शनं॥६२॥तांदृष्ट्वाचारुसर्वांगीं[illegible]सहितयावधि॥कथं
विहर्येमालंब्यस्थितवानस्मोहितोप्यहं॥६३॥ततस्तृतीयेदिवसेतद्रूपंविश्वमोहनं॥वीक्ष्यानुभूतायाहर्वंव्यवस्थाप
रलौकिका॥६४॥क्षणेनममसर्वस्यसपर्यापिचविस्मृता॥ततोविधायपूजांसाशिवस्यचलितायदा॥६५॥तदाहमपि
मोहात्तांगृहीतुंपृष्ठतोन्वगां॥सावेगात्माभनादृत्यप्रविश्यविवरंययौ॥६६॥एवंसानित्यमेवास्माद्विलादायातिगच्छति
अहंनयावद्धस्तेनग्रहीतुंयामितावता॥६७॥विलोक्यमांविहस्यात्यंप्रयातिबिलवर्त्मना॥एवंभवतितत्राभिरंतस्यामद्रातना॥६८

419/1995

द०कु०
६

इतितेशांप्रवीप्रकिः परलोकस्यपुण्यजः॥नष्टमेत–यमपिस्मीप्रापिश्चनविद्यते॥६९॥इदानीलंमहाभागाइतिमत्वामय
विप्रो॥वृत्तंमदीयसकलंनवाये विनिवेदितं॥७०॥अतःपरंयदुक्तिंततकुरुष्वाविलंबितं॥तछ्रुत्वाराजपुत्रस्तेभ्रोवाचद्विजपुं
गवं॥७१॥विप्रेंद्रायसंसैन्योस्मन्त्स्थित्वानिवेशयत॥स्कंधावारंबहिःसर्वेनिशीथिन्यांसमागतः॥७२॥एकएवसमागत्यत्रा
सादेस्मिंस्तवांतिकं॥उपक्रमंकरिष्यामिमिमिद्धिरत्यपरमेश्वरः॥७३॥तमित्युक्तासमभ्यर्च्यत्र्यंबकंलिंगमुत्तमं॥स्वसैन्यमागमछी
घ्रंकुमारोराजवाहनः॥७४॥ततःसैन्यंयथास्थानेनिवेश्यकृतमज्जनः॥बुभुजेसुधातुल्यंभावभिर्नवभिःसह॥७५॥भोज
नांतेसविश्रम्यसंजातेरजनीमुखे॥सर्वमौन्यंतथाप्ताकार्यंनिवेदयाब्रवीत्॥७६॥अद्यास्मिन्देवनागारेरात्रौस्थित्वासमा
हितः॥शर्वमाराधयिष्यामियथावद्ध्यानपूर्वकं॥७७॥अतस्थातव्यमत्रैवभवद्भिर्नद्र्यावित्ता॥इत्युमाकर्ण्यतेसर्वेराजवाहनभा
षितं॥७८॥ज्ञात्वाबुशिवसेवायामासक्तिंतस्यसर्वदा॥तान्युस्तन्निषेधंवतचक्रुस्तस्यनिश्चिताः॥७९॥ततःशस्त्राण्युपादायस
नद्धोराजनंदनः॥प्रविश्यशंभुप्रासादमेकाकीधैर्यवान्निशि॥८०॥आत्मणस्यांतिकेतस्थावनिवार्यपराक्रमः॥उवाचद्विजाग्र्या
हस्कस्त्वोस्म्यत्रैवमत्तले॥८१॥यद्यसात्रसमायातिसुंदरीशिवसंनिधौ॥तदेवसहसोत्थाप्यस्त्वयाहमविशंकितं॥८२॥इत्युक्त्वा
वाससाछेनसमाछाद्याखिलंवपुः॥कृत्वापकपटेनैवप्रतीक्षंस्तसमागमं॥८३॥ततस्तत्सैनिकाःसर्वेविदित्वांतःस्थितंविभुं॥तद्र
क्षार्थेशिवागारंपरितोवध्यसुर्निशि॥८४॥एवंनिशीथसमयेसंजातेपूर्ववद्धिलात्॥विनिःसृत्यसमायातासायोषिछिवसन्निधौ॥
८५॥विधायपूर्ववत्पूजांशंभवीभावपूर्वकं॥गीतनृत्यादिकंचैवगंतुंप्रचलितायदा॥८६॥तदाविप्रेणसेज्ञप्तःकुमारःसहसोत्थि
तः॥यतोमहानुभावाक्षिप्रंतिलघुचेतना॥८७॥परोपकृतिसंजातचिंताव्याकुलितोनरः॥प्रायेणयेनयस्यस्यात्कार्यमंगी
कृतंस्वयं॥८८॥सार्चितातस्यप्रवर्तिसौनतिश्चितनामियात्॥अतःशीघ्रंसमुत्थाययावद्विशतिसाबिलं॥८९॥तावत्तत्प्रविल
द्वारेविलिख्येतिरूपात्मजः॥दुःखीयंममभिन्नाणिप्रागायास्याम्यहंपुनः॥९०॥साधयित्वाद्विजाभीष्टमन्वगात्तांसवाडवः॥अनु
६

401
1995

यातिकुमारेसाप्रविष्टैवबिलांतरे॥९१॥कुमारःसद्विजस्तत्राप्यनुयात्येववेगवान्॥ततःपश्यतएवास्यक्षणेनांतर्हितेवसा॥९२
विलोकयन्नयनस्याःसगछन्तेनैववर्त्मना॥ददर्शपुरतोरम्यंपातालेनगरोत्तमं॥९३॥पुरंदरपुरीसारमादायेवविनिर्मितं॥यत्र
हेमानिहर्म्याणिद्वाराणिस्फाटिकानिच॥९४॥अनर्घ्यमणिमाणिक्यरचितान्यंतरांतरा॥स्निग्धैःसर्वर्तुकुसुमैर्युतानिवि
विधैर्द्रुमैः॥९५॥नंदनादतिरम्याणिवनान्युपवनानिच॥नास्मिन्मनुष्यमात्रस्यप्रचारःक्वापिदृश्यते॥९६॥ततःप्रविश्यत
स्यांतःकुमारोविप्रसंयुतः॥अगमत्तत्रयत्रास्तिराजद्वारंसुशोभनं॥९७॥तत्रगत्वाप्रविश्यांतर्विलोक्यवरवाटिकां॥तन्म
ध्येमंदिरंचित्रस्वर्गसंपद्वि–त्वरं॥९८॥ददर्शविस्फुरद्रत्नबद्धसोपानदीर्घिकं॥ततःप्रवेशंतस्यांतर्विधायनृपनंदनः॥९९
सविप्रःप्रक्षिपन्दृष्टिसर्वत्रानंदितांतरः॥दोलापर्यंकिकारूढामाधारेलीलयास्थितां॥१००॥तामेवस्त्रियमद्राक्षीद्यद
र्थंससमागतः॥सखीचतुष्टयंचास्यापार्श्वस्थमतिसुंदरं॥१॥यदातयाराजसूनुःसविप्रःसविलोकितः॥तदासार्धावि
कांप्रजांगृहीत्वाभिमुखंययौ॥२॥ततःसंपूज्यविधिवत्कुमारंस्तुतिपूर्वकं॥उपवेश्यासनेदिव्येसान्यदासनमाश्रितः॥३
पप्रच्छसर्ववृत्तांतंविश्रांतंराजवाहनं॥स्वामिंस्त्वदन्वेनकापिदृष्टःसाहसिकायणीः॥४॥यन्निर्जनेवनेरात्रौप्रासादेश
र्वतीपतेः॥एकाकीसुचिरंस्थित्वासर्वत्राधतमोवृते॥५॥बिलप्रवेशंकृतवान्विषमेतिभयंकरे॥रक्षःप्रेतपिशाचादिन
नादृत्याविशंकितः॥६॥अन्यच्चनिर्मनुष्येस्मिन्नगरेसमुपागतः॥अतःकथयतेस्थानंकुत्रास्तिपितरौचकौ॥७॥त्वयापु
त्रेणविदितोवृनार्यौकिंचकारणं॥समागमेप्रनामापिकिंनेतिरूचिरास्सरं॥८॥इतिपृष्टस्तयाराजकुमारःप्रत्यभाषत॥
मद्वृत्तांतमहंपश्चात्कथयिष्येनवाधुनाः॥९॥पुरंयदर्थमायातस्तत्तेहंकथयेतदा॥यदित्वंपरिणीताबातेत्यादौकथयिष्यसि
१०॥त्वं––तामिकेनापिपरस्त्री॥तिनयुज्यते॥वक्तुमेवत्वयासार्धंमयाशुद्धांतरात्मना॥११॥कुमारिकाचेद्वृत्तांतमदीयंक
थयामिते॥मत्तुवाचततःसास्त्रीमहापुरुषसद्वचः॥१२॥शृणुधावद्विनोभत्वाकुमार्योवास्मिसांप्रतं॥अतोयद्वृत्तमुचितंतदाज्ञा

द॰कु॰
१

पयसत्वरे॥१३॥इतितस्यावचःश्रुत्वाप्रनिवाक्यमुवाचसः॥यथापुण्या भवस्त्राद्या भोगानानाविधाःशुभाः॥१४॥ईश्वरेणमनुष्या
र्थंनिर्मिताःप्रमदोत्तमे॥तथास्तीसंततीपुंसामुपयोगायकल्पिता॥१५॥अभुक्तान्येवसर्वाणियथान्नादीनिकेनचित्॥स्वयमेव
विशीर्यंतेतेषांपुण्यंनजायते॥१६॥निरर्थकविनाशेनप्रत्यवायोभवत्युत॥यायोषित्पुरुषेत्यागात्कुर्वतीजपादिकं॥१७॥क
रोत्यनर्थकंजन्मपापमेवा— यात्परं॥अन्यच्चजातिर्नारीणांयावतीयत्रविद्यते॥१८॥पुंसामर्थेविधात्रासासकलापिविनिर्मि
ता॥साचेत्पुंसांदुःखदात्रीस्यात्ततोनिरयंव्रजेत्॥१९॥सामान्यानांनराणांचेत्दुःखदानादिदंभवेत्॥विप्राणांदुःखदा
नेनयत्पापमुपजायते॥२०॥अनिर्वाच्यंभवेत्तत्तनकथंचिन्निवर्त्तते॥सत्येवंविप्रवर्योयंपरलोकस्यसिद्धये॥२१॥ईश्वराराः
धनकुर्वन्नत्रस्थलत्रशिवालये॥एकाग्रचित्तःसांत्यादिगुणैर्युक्तोजितेंद्रियः॥२२॥एतस्मिन्समयेत्रार्चनप्रजार्थंतस्य
मागता॥प्रासादेबिलमार्गेणरूपयौवनशालिनी॥२३॥सौंदर्यहावभावादिभवदीयंविलोकयन्॥सर्वोकृष्टक्षणे
नैवकामेनायंहतःशरैः॥२४॥ततोदुःखार्जितंभ्रष्टंरितपोविस्मृत्यविह्वलः॥त्वत्प्राप्त्युपायंमनसाचिंतयन्मूढवत्स्थि
तः॥२५॥त्वमेवंपरलोकस्यसाधनप्रति बंधिका॥अस्यद्विजस्यजातासिसत्यमेतन्नसंशयः॥२६॥अन्यच्चानेनति
द्दिनत्वयिचित्तंसुनिश्चलं॥त्वंच— गीकरोष्यनमेवंवेदस्यजायते॥२७॥किमप्यनिष्टंत्वंविप्रस्यत्वन्निमित्तंततस्तव॥प्र
तिष्यंत्यधमालोकास्तत्तत्नानाग्निवालिशे॥२८॥त्वंमदर्शनमालापाज्जातासिभगिनीमम॥अतस्तवहितंयत्स्यात्तद्व
क्तव्यंमयाध्रुवं॥२९॥तस्मादेतंद्विजश्रेष्ठमंगीकुरुममाज्ञया॥एवंतेशिवपूजायाःप्रभावादन्य— लंभात्॥३०॥पातिव्रत्य
स्यचतथाप्रत्यहंपरिपालनात्॥सिद्धिर्धर्मार्थकामादिपदार्थानांभविष्यति॥३१॥इत्युक्तवंतंसातानकुमारंप्रत्यभाषत॥
महाशयत्वयायन्मेकथितंसत्यमेवतत्॥३२॥परंशृणुमदीयंत्वंवृत्तांतंसर्वमादितः॥प्रियदर्शनसंज्ञस्यगंधर्वाधिपतेर
हं॥३३॥पुत्रीरत्नावलीनाम्नातथैवापितृवल्लभा॥दैवान्मेजातमात्रायारूपमेतदलौकिकं॥३४॥वर्द्धमानंप्रतिदिनमप्र

423
1495

तुलंयथैंदवः॥तस्मादस्यतुलाद्रूपाद्— मू— दिमेमहान्॥३५॥एवंकालेनकियतासंजाताजानतीकियत्॥तदैकदासम
रव्यासार्द्धंक्रीडासवयस्यया॥३६॥मयायस्यांभवत्येकास्त्रीरूपावापरःपुमान्॥क्रीडायांवर्त्तमानायामिछमेकासखीपु
मान्॥३७॥भूत्वाप्रोवाचमामेहिकुरुमेत्वपरिग्रहं॥नछुत्वाबाल्यभावेनमयेत्युक्तंसुसखींप्रति॥३८॥एतादृशःपुमान्को
स्तियोमेकुर्यात्परिग्रहं॥सपुमानसखिमेनूनंकुर्यात्पाणिप्रपीडनं॥३९॥सहस्रद्रोणतैलेनतप्यमानेनवह्निना॥स्वर्णकटाहे
कृत्वायःप्रवेशंनिःसरिष्यति॥४०॥अंगीकारंकरिष्येहंतस्यनान्यस्यकस्यचित्॥इत्युक्तावतयाप्रोक्तंसखारत्नावलींप्रति॥४१॥
यदिदैवकृतंकोन्य स्मैत्वांवरायप्रदास्यति॥पित्रावरवशात्तूर्णंततस्त्वंकिंकरिष्यसि॥४२॥ततःप्रतिज्ञाविहितासखीतांपुरतोमया॥
पूर्वंममप्रतिज्ञातंविफलीकृतचेत्पिता॥४३॥अन्यस्मैदास्यतितदाप्राणत्यागंकरोम्यहं॥ततःक्रमेणयेराजकुमाराणांसमाग
ताः॥मत्प्रार्थितार्यविविधाद्भुतामत्पितरंप्रति॥४५॥श्रुत्वावचांसितेषांसदातुमामकरोन्मतिं॥तदामयामत्प्रतिज्ञाज्ञापिताजन
कस्यमा॥४६॥ततःपितृभ्यांसुमहानाग्रहोविहितोमम॥परंममहठंमत्वामरणंप्रतिनिश्चयं॥४७॥ताभ्यांममोपरिमहान्कृतः
क्रोधोतिदुःसहः॥तथापितपरित्यक्तंयन्मयांगीकृतंपुरा॥४८॥ततःपित्रापरित्यज्यक्रोधेनदृढचित्ताश्रितं॥इमांरत्नावलींकन्यांत
चकस्यापितेत्रयोः॥४९॥गोचरेस्थापयिष्यामिचिरसुत्स्वज्यतेनतदा॥भविष्यत्यनिशापोवासत्यमेतन्नसंशयः॥५०॥यावत्कालंभ
वेत्पुत्रीगृहेकन्यामनोरमा॥तावत्सर्वोपिकुरुतेतस्यावाछामहर्निशं॥५१॥इत्थंविचार्यबहुधाजानत्दुःखमस्थिता॥ममास्ति
मित्रंपातालेदुर्दमोनामदैत्यराट्॥५२॥तस्यास्तिनगरेहद्दंनिवासायमनोरमं॥तमेवंनगरयांचेयाचितःसप्रदास्यति॥५३॥गृही
त्वानगरंतस्मादेकंपातालस्पर्पणं॥ततःसार्द्धंविधास्याभिसमयंशपथैर्दृढं॥५४॥दैत्यराजत्वयानात्रप्रवेष्टव्यकदाचन॥अन्यो
पिवःपुमानस्त्रीवाबालोवाट्टद्धएववा॥५५॥अस्मिन्प्रवेशंकुरुतेसवध्यस्तेभवेदिति॥इतिनिश्चित्यपातालंगत्वादैत्यपते
स्यत॥५६॥सत्कृतस्तेनबहुधातमुवाचदस्निवाद्दौपर्वणितंपुत्र्याद्दत्तांतंसर्वमादितः॥५७॥ततोययाचेदैत्येंद्रंमत

र.कु.
८

सायहित्वारितं॥प्रतिज्ञारूणमेकंमेसरवंनगरमर्प्यय॥५८॥अहंचवात्पुत्र्यास्तेयःकोप्यंगीकृतंदृढं॥प्र—करिष्यतितदा
तेनसार्धंभुभेदति॥५९॥विवाहविधिनाकृत्वादंपत्योःपुरमर्प्यये॥ततस्तौस्वेछयैवतेनहिजनवासयिष्यतः॥६०॥इतितस्यव
चःश्रुत्वासरवुप्राणाधिकस्यतन्नु॥तस्मैददौपुरवरंप्रतिज्ञायसदैत्यराट्॥६१॥तस्मादंतःकृहत्वेवंमामानीयस्वमंदिरात्॥
स्थापयित्वात्रमामत्र—धाकलुषितःपिता॥६२॥हेदुर्विनीतेमोहाद्याप्रतिज्ञाविहिताद्दृढा॥तस्याःफलंभुंक्ष्वचिरंशून्येस्मिन्न
गरेस्थिता॥६३॥यस्मादेवंत्वयापुंसत्तिरस्कारःकृतोमहान्॥तस्मात्कदाचित्पुरुषंनदृष्ट्वापिप्रपश्यसि॥६४॥अतःपरंत्व
मेकाकिन्येवात्रचिरमावस॥ततोमत्सनिधेर्मुक्तावयस्यानांचतुष्टयं॥६५॥मद्रक्षणार्थंदैत्यस्यवह्नत्काप्रययौपिता॥अ
थतत्रस्थितैवाहमेकाकिन्यतिदुःखितदुःखिता॥६६॥किंकरोमिक्वगच्छामीत्येवंचिरमचिंतयं॥एकस्मिसमयेदैत्यःससम्प्रा
यैमत्सखी॥६७॥तस्याममसुखेनेतिकथयामाससादरं॥य—मदीयेनगरेसमागत्यव्यवस्थिता॥६८॥अतस्त्वंममजा
नासितनयैवनसंशयः॥इदानींत्वत्प्रतिज्ञायाःसिद्ध्यैकथयामिते॥६९॥उपायमेकंतंशीघ्रंतंकुरुष्वाविचारितं॥यथास्व
त्वेप्सितःपूर्णाप्रतिज्ञातेभविष्यति॥७०॥वांछितंचपतिंशीघ्रंलप्स्यसेतिमनोरमं॥इत्युक्त्वाबिलमार्गेणमत्सख्यालिंगमी
श्वरं॥७१॥प्रासादंदर्शयित्वाचसदैत्यःप्राहमामिति॥समाराध्यमिदंस्थानमतिशीघ्रफलप्रदं॥७२॥नैतादृशंमयान्यत्रद्येलो
केपिनिरीक्षितं॥एतस्याराधनायैवनगरेस्मिन्मयास्थितं॥७३॥अम्ब—तस्मात्प्रतिदिनंनिशीथेत्वंसमुद्धय॥अचागत्येश्वरं
भक्त्यासर्वाभीष्टार्थसिद्धये॥७४॥अचिरेणैवकालेनवांछितंफलमाप्स्यसि॥एकाकिनीभयंमागाःप्रतिज्ञाविहितामया॥७५
प्रवेशोनगरेस्यास्यतस्मादस्यबहिःस्थितः॥रक्षांतवविधास्यामिसत्यमेतन्नसंशयः॥७६॥सखीमुखेनदैत्येंद्रःसइत्थंमांस
मादिशत्॥अहंतद्दिनमारभ्यशांभवीभक्तिमत्यहं॥कृशोभिमध्यराचिस्मिन्प्रासादेसंयतेन्द्रिया॥७७॥अ——मेकदाद्य
विप्रःसर्वांगविक्षतः॥मयाप्रासादमध्यस्थउपविष्टःकथंचन॥७८॥एवंसतीत्वंवदसियत्ताप्रतेभविष्यति॥ममापराधोत्रकि

यानविद्यतेकथयस्वतं॥७९॥अहमेकाग्रमनसानित्यकर्मप्रकुर्वती॥स्त्रीसतीपुरुषंचितेकदाचिन्नैवचिंतये॥८०॥अयंतुब्रा
ह्मणोवस्थामीदृशीप्राप्तवानपि॥मनःस्वकार्येस्ववशेनस्थापयतिमुंचति॥८१॥निर्मर्यादंततोस्यैवदोषोभवतिनिश्चितं॥सत्यमेते
नत्प्रतिज्ञामयंपूर्णाकरोतिचेत्॥८२॥ततस्तेनैत्कपूर्णेस्मिन्कटाहेधृतसाहसः॥प्रविश्यःतिःसरत्वयततएतंवरुणोम्यहं॥८३
पुरेचेतत्महाश्चर्यंममवेत्तमिवर्त्तते॥यत्तस्यराक्षसेंद्रस्यतादृशोंगीकृतेसति॥८४॥यूयमत्रसमायाताःकथंप्रतिगमिष्यथ
त्वत्सौंदर्यसविनयंविलोक्यममचेतसि॥८५॥वर्त्ततेमहतीचिंतानजानेकिंभविष्यति॥ततःसराजपुत्रस्तांप्रत्युवाचसमं
न्वित॥८६॥एतद्विषयिणींचिंतांत्वमल्पामपिमाकुरु॥राक्षसस्यस्यैतरमहंप्रदास्यामियथोचितं॥८७॥परमेतस्यविप्रस्यक
थंसिद्धिर्भविष्यति॥ततस्तंप्रत्युवाचेदंसास्त्रीविस्मितमानसा॥८८॥यदिमद्वरणेच्छायाःसिद्धिस्यभविष्यति॥आत्मन
स्यततोप्यीतिनंदैत्याद्विद्यतेध्रुवन्तु॥८९॥परंतदेवविषमंमहापुरुषदृश्यते॥ततःसराजस्तुरुस्तामूचेरत्नावलीप्रति॥९०
अस्मिन्यदिकटाहेद्यप्रवेशंप्रस्तरोम्यहं॥ततस्त्वमस्यविप्रस्यकरिष्यसिपरिग्रहं॥९१॥इत्याकर्ण्यतयाप्रोक्तंकटाहेस्मिन्नप्र
वेशोनियः॥प्रवेशंसभवेद्दूतमिमेत्यंगीकृतंमया॥९२॥तच्छ्रुत्वाराजपुत्रेणवीक्षितेविप्रसम्मुखं॥ततःप्रोवाचविप्रस्तंराजपुत्रा
वधारय॥९३॥एतद्विषयिणींचिंताचित्तात्परिहराधुना॥कटाहेस्मिन्नुभयथाप्रवेष्टव्यंमयाखलु॥९४॥यस्मादेकाग्रतान
ववादीश्वराराधनेगतं॥एतस्यायोषितोऽप्यास्यांमरणंयद्भविष्यति॥९५॥तद्दुःखेनक्रमेणाततोमहद्दुःखंप्रदंभवेत्॥कटा
हेस्मिन्प्रवेशेममरणीच्छाप्रमेवहि॥९६॥एतस्माद्दुःसहाद्दुःखान्मुक्तिर्भवतिनिश्चितं॥अन्यच्चप्राप्तिरेतस्याःकटाक्षिज्ज
तोंतरा॥९७॥ममसंभाव्यतेनूनंसाहसादतिलौकिकात्॥एतस्यदुष्टदेहस्यस्याहंतावतिःकृतिः॥९८॥इत्युक्त्वासकटा
हाभिमुखंप्रचलितोयदा॥तदासाराजपुत्रंतंप्रत्युवाचातिविस्मिता॥९९॥महापुरुषविप्रोयंदुष्करंसाहसंयदि॥विधा
तुमुद्यतोत्रत्वंविधिवन्नकरोतिकिं॥१००॥यत्कोपिचित्तेसंकल्पोविद्यतेस्यतमुच्चरन्॥एतस्मिन्दीर्घिकातोयेस्नात्वासमाहितः १

425
1995

र॰श्रा॰

९

प्रतप्तंतैलपूर्णेस्मिन्कटाहेप्रविशत्वयं॥ कदाचिदीश्वरस्तुष्टः साहसादतिदुःकरात्॥२॥ स्तनस्यवांछितंपूर्णीकरोतिकरुणा
करः॥ इतितस्यावचः श्रुत्वाराजपुत्रंप्रतीमितं॥३॥ विप्रस्तस्यांदीर्घिकायांस्नात्वासंतर्प्यपूर्वजान्॥ ब्रह्मविष्णुशिवादित्यस्तु
तिंकृत्वाप्रणम्यच॥४॥ कटाहसन्निधौस्थित्वाइतिवाक्यमुवाचसः॥ अहमेकाग्रचित्तश्चेदेतस्याएवयोषितः॥५॥ प्राप्तिंवां
छन्नग्नितप्तंतैलपूर्णकटाहके॥ प्रविशाम्यस्मिन्जन्मांतरेपिप्राप्तिरस्तुमे॥६॥ अस्याएवस्त्रियोनूनमित्युक्त्वासहसापतत्
तस्मिंस्तापादग्निरूपेकटाहेतिभयंकरे॥७॥ ततःपतितमात्रःसतैलेलीनोभवत्क्षणात्॥ मुहूर्त्तानंतरंतस्मात्कटाहाद्दुतिर
यौ॥८॥ नासत्यसुंदरोदिव्यनानाभरणभूषितः॥ तंदृष्ट्वाराजपुत्रस्यसंतोषोतिमहानभूत्॥९॥ विस्मयश्चतथाचित्तेनतोन्वै
दुःकरस्यसः॥ स्तुतिंबहुविधांचक्रेसाहसस्यद्विजन्मनः॥१०॥ व्यलोकयच्चवदनंतस्याः किंचिद्धसन्निव॥ तदारत्नावलीतंप्र
त्युवाचेदंवचःशुभं॥११॥ महापुरुषयामेभूतप्रतिज्ञामनसिस्थिता॥ साद्यसर्वापिसंपूर्णाजाताभवदनुग्रहात्॥१२॥ इ
त्याकर्ण्यततोराजसुतस्तुष्टामित्युवाचसः॥ अतःपरंकुतोहेतोर्विलंबःक्रियतेत्वया॥१३॥ इदानीमेवसल्लग्नंमुहूर्त्तंचाति
लाघवं॥ वृणुष्वैनंद्विजश्रेष्टंनात्रकार्याविचारणा॥१४॥ इत्याकर्ण्यवचःस्तस्यवदनात्समुदीरितं॥ वरमालान्तयाविप्रग्रीवा
यामवलंबिता॥१५॥ ततःसोवाचतंस्वामिन्महत्त्वंविदितंमया॥ अतःपरमिदंवृत्तंसर्वमाकर्ण्यमत्पिता॥१६॥ शीघ्रमागत्य
विधिवद्विवाहंसंविधास्यति॥ महासत्वःपुमान्कश्चित्साहसंकुरुतेयथा॥१७॥ तथात्वयाकृतंधैर्यात्त्वामितरैःसुदुःकरं
साहसाच्चततैवतस्मादर्थसिद्धिर्ममाभवत्॥१८॥ इत्युक्त्वासाद्विजश्रेष्ठमूचेराजसुतंप्रति॥ महेश्वरेणमेदत्तस्त्वंभ्रातायस
हादरः॥१९॥ अतःपरंमवेद्यन्मेकथनीयंवदस्वतत्॥ वृत्तांतमेतन्मह्यंसायावद्दैत्यमुखेनमे॥२०॥ पितुःश्रुतिपथंप्राप्तंक
रोतिचिरकांक्षितं॥ सचाप्यागत्यविधिवद्विवाहंविदधातिमे॥२१॥ तावन्निष्टसियघत्रतदात्वद्दर्शनाद्यथा॥ दृष्टिःकृतार्थाजा
तामेतथात्वांवीक्ष्यमत्पितुः॥२२॥ दृष्टिःकृतार्थभवतिसत्यमेतन्नसंशयः॥ अन्यच्चमेपितागाथाश्चिंता  कृतोस्तियः॥२३

सकाचिदपितेभक्तिंकरोतिप्रीतिपूर्वकं॥ सचराक्षसराजोपिवृत्तमेतत्सखीमुखात्॥२४॥ श्रुत्वाप्रकारैर्विविधैस्तवभक्तिंवि
धास्यति॥ त्रिलोक्यांनमयादृष्टःसाहसीसदृशस्त्वया॥२५॥ नाकर्णितश्चकर्णाभ्यांयद्रूपंविस्मयोद्भवं॥ एकाकिन्यामयालोक्य
तवधैर्यनिधेर्मनः॥२६॥ अल्पामपितसंप्राप्तंविक्रियांपापवासायकैः॥ साधितश्चमहानर्थोविप्रस्यमनसिस्थितः॥२७॥ अ
तोजगतिदृष्टैकापुत्रीणिजननीतव॥ त्वांयाभारंवहंत्येवगर्भेजेनात्रसंशयः॥२८॥ इदानीमस्मदीयांवंभ्रातर्विज्ञापनांश्रृ
णु॥ दिनानिकानिचितिष्टसुखेनात्रनृपात्मज॥२९॥ ततःपरंद्विजेनापिराजसूनोरनेकधा॥ विहितास्तुतिरत्यर्थंप्राप्तसर्वा
र्थसिद्धिना॥३०॥ ततःसराजपुत्रोपिदंपतीप्रत्युवाचतौ॥ अहंकृतार्थःसंजातोमह्यमाज्ञांप्रयच्छथ॥३१॥ युवांगच्छा
म्यहंपश्चान्मत्सैन्यंमहिनास्थितं॥ भविष्यतिकथंकार्यंतन्नजानामिदुःखितं॥३२॥ अतोमयाक्षणमपिस्थातुमत्रन
शक्यते॥ ततोरत्नावलीतंप्रत्युवाचविनयान्वता॥३३॥ भ्रातरेततुरंमह्यंभांडागारसमन्वितं॥ प्रदत्तंदैत्यराजेनतूनंमति
तुराज्ञया॥३४॥ चिंतामणिंविधायादौयाःकाश्चिद्रत्नजातयः॥ विद्यंतेत्रगृहाणत्वंताःसर्वाअप्यसंशयं॥३५॥ इत्युक्त्वा
सर्वरत्नानिसमानीयतदर्शनः॥ यदानयाविमुक्तोतिनदातांप्रत्युवाचसः॥३६॥ त्वमयाभगिनीप्राप्ताअयंचभगिनीपतिः
एतद्रत्नद्वयंलब्धंमयायद्यन्यदुर्लभं॥३७॥ ततःपाषाणरूपैःकिंरत्नैरन्यैर्ममापरैः॥ इत्याकर्ण्यनृपप्रोक्तंवचनंमधुरा
क्षरं॥३८॥ मणिरत्नावलीकंचित्प्रशंसास्यजगादसा॥ महाशयत्वयोक्तंयद्युक्तमेवतत्संशयः॥३९॥ परमेकंमहारत्नंगृ
हाणगुणवत्तरं॥ एतद्रत्नंदधानस्यनश्यंतिक्षुत्तृडामयाः॥४०॥ शस्त्राणिग्रहचौरादिसिंहादिभ्योभयान्यपि॥ इत्युक्त्वाते
मणिंतस्मैसादादौप्रीतिपूर्वकं॥४१॥ सचतद्वचनाच्छ्रुत्वागुणांस्तस्यान्यदुर्लभान्॥ गृहीत्वातंमणिंदिव्यंतावापृच्छ्यचसत्व
रं॥४२॥ तस्मात्स्थानात्सचलितोगमनायपथागतं॥ ततःप्रातःसमुत्थायययावत्सर्वंपंनिसैनिकाः॥४३॥ तावत्प्रासादमध्ये
सराजसूनुर्महाशयः॥ शस्त्रविक्षतसर्वांगःसद्विजोपितदृश्यते॥४४॥ ततोविचारितचित्तेतैःसर्वैरतिविस्मितैः॥ नूनं

427/1995

द०कु० १०

योत्रस्थितोविप्रःसविप्रोनैवकिंत्वयं॥४५॥मायारूपंप्रविष्टोत्रदानवःकश्चिदुत्कटः॥सएवराजतनयंगतोहत्वानसंशयः॥४६
इत्थंविमृश्यतैःसर्वैर्नवभिःपालितैस्तदा॥राजहंसेनपुत्रैस्तैर्नानास्थानागतैःशुभैः॥४७॥तद्दर्शनसंतप्तैरित्युक्तंसैन्यकान्प्रति
युष्मत्सर्वमिदंसैन्यंनीत्वायातयथागतं॥४८॥वयंनैवागमिष्यामोराजहंसनृपांतिकं॥राजवाहनसंज्ञेनविनाभ्रात्राविदुःखि
ताः॥४९॥सहैवराजपुत्रेणनगरस्यप्रवेशनं॥करिष्यामोथवातस्यविलोकनपरायणाः॥५०॥कुर्वंतोभ्रमणंदिक्षुविधास्या
मोवपुःक्षयं॥इत्युक्त्वातेखिलंसैन्यंप्रेषयित्वापुरींप्रति॥५१॥स्वयंपृथक्पृथक्याताएकैकाक भ्रमंति॥सतस्मिन्समये
राजपुत्रस्तस्माद्बिलाद्बहिः॥५२॥आगतोनैववातान्भ्रातृन्सैन्यंवापिनपश्यति॥पश्चाद्विचारितंचित्तेममतेभ्रातरस्तथा॥५३
नभवंतियथापुत्रकामायांनिजनकांतिकं॥अनस्तेमद्देशार्थंप्रविष्यंतिगताःखलु॥५४॥अहंचैतैर्विरहितएकाकीपितु
रंतिकं॥गत्वाभिलोकेपुत्रतोवाच्यतामियमवेद्दृशं॥५५॥यदयंपालितान्भ्रातृन्राजलोभेननिश्चितं॥विनाश्यायंभ्रसमाया
तएकोनिजपुरींप्रति॥५६॥अतोयादृगनिक्षेपोनादृश्यैवममास्थितिः॥विनिश्चित्यप्रचलितस्तैदेवनृपनंदनः॥५७॥विलो
कनायभ्रातॄणांनानादेशांतरानटन्॥प्रापउज्जयिनींदेवोमा वेराजवाहनः॥५८॥ततस्तस्याउपवनेसहकारतरोरधः॥वि
श्रामायगतस्तत्रदृष्टोसमवस्थितं॥५९॥पुष्पोद्भवंपुरंबंधुंविनाक्रांतंनृपात्मजः॥पुष्पोद्भवोपितंवीक्ष्यचिरात्प्राणमिवाग
तं॥६०॥उत्थायपरयाप्रीत्याप्रणमत्यांतस्यशास्वि ॥६१॥तदग्रेकथयामासनिजवृत्तमशेषतः॥अहंप्रसादरक्षार्थंयुष्मा
कउत्कासमैस्तैनिकान्॥६२॥तस्यांतरेनिशीन्यांस्थितस्तत्कारणंश्रृणु॥तस्मिन्महेश्वरागारमध्याद्धेशिवपूजनं॥६३॥मयाविद
नाविप्रोवीक्षितोयःक्षुधातुरः॥सदृष्टःसर्वमाचष्टस्ववृत्तांतममायतः॥६४॥एतच्चसर्वंमयाकथितंभवतामतः॥यद्युष्मा
भिःपरिज्ञातंवृत्तंतस्मिन्बंधुभिर्मया॥६५॥रात्रावेकाकिनास्थातुंप्रासादेस्मिन्नशक्यते॥एकाकिनाविनाचैतद्विप्रकार्यंनसिध्यति
६६॥ततस्तत्कार्यसिद्ध्यर्थमेकाकीशिवमंदिरे॥तस्मिन्गत्वास्थितोयावत्तावद्देवसमागता॥६७॥मध्यरात्रेबिलात्तस्माद् १०

429/1995

निःसृत्यवरांगना॥तथाविधैवयादृक्साविप्रेणोक्तामामागता॥६८॥आगत्यशिवपूजांसाविधायविधिवत्ततः॥पर्यालोक्यप्रचलि
तातेनैवबिलवर्त्मना॥६९॥मयापितामनुसृतंसहानेनद्विजन्मना॥बिलप्रवेशेविहितस्तस्मिन्नेवार्थसिद्धये॥७०॥प्रवेशंकुर्वतातत्र
त्रस्तोकःपूर्वोपवर्णितः॥बिलद्वारिविस्थितोविप्रोमयेत्याधायचेतसि॥७१॥यन्मामद्रष्ट्वासासादेस्थोकमुद्वीक्ष्यनिश्चिताः॥नवैवात्रस्थि
तोयुष्यंमत्वानीसांकरिष्ये॥७२॥नान्यत्रगमनेबुद्धिंविधास्यथकथंचन॥परंनवीक्षितस्तोकोभिरखिलैरपि॥७३॥मद्दर्शनसंजातः
दुःखविश्रांतमानसैः॥तस्मान्नयूयंसैन्यंचतत्रासीत्किमपिस्थितं॥७४॥अहंचैतेनमार्गेणशीघ्रंपातालमभ्यगां॥तत्रगत्वास्थि
यास्तस्याःकृत्वाप्राप्तिंद्विजन्मनः॥७५॥प्रत्यागतःसमभ्येत्यशिवप्रासादसन्निधौ॥यावत्पश्याभिपरितस्तत्रकोपिनविद्यते॥७६
ततोमयादुःखितेनमनसेतिविचारितं॥यत्नूनंबांधवाःसर्वेस्थितानितिमयि॥७७॥यथामयाविनानैवतैर्गतंबांधुभिर्निजैः॥७८
प्रवेशंनकरिष्यामिस्वपुरस्यकदाचन॥एवंविनिश्चित्यपरिभ्रमणंकुर्वतामया॥७९॥भूमंडलेद्यपाश्चात्यरजन्यांसमुदीक्षितः
स्वप्नेलंततउत्थायशीघ्रमागच्छतामम॥८०॥महारुद्रस्यकृपयासंज्ञातस्त्वत्समागमः॥इतिवृत्तांतमाकर्ण्यराजवाहनवाक्यतः
८१॥पुष्पोद्भवःपरंप्रीतःसंयोजितकरद्वयः॥प्रभोरग्रेस्ववृत्तांतंप्रवक्तुमुपचक्रमे॥८२॥देवद्विजार्थोपबिलप्रवेशोविहितस्त्व
या॥नास्माभिर्विदितःकिंतुमनसेतिविचारितं॥८३॥यःकोप्यत्रोपविष्टोस्त्रद्विजःस्वार्थसमृद्धयेतिनिजकार्यसिद्ध्यर्थंत्वां प्रति
प्रार्थ[illegible]ता॥८४॥तांनिशाम्यकृपाक्रांतचित्तःसाहसिकाग्रणीः॥तेनैवसाकंकुत्रापिनूनंतत्कार्यसिद्धये॥८५॥प्रया
तस्त्वमतःशीघ्रंनघटेतागमस्तव॥इत्थंनिशाम्यनवभिरस्माभिस्तवसेवकैः॥८६॥निश्चयोविहितश्चित्तेदृढस्त्वद्विरहातुरैः
यद्विनास्वामिनानूनंनगरस्यप्रवेशनं॥८७॥वयंनैवविधास्यामःपश्यामोतत्रयात्विताः॥राजानंराजहंसंतंदेवींवसुमती
तथा॥८८॥केवलंकुर्वताभ्रमेभ्रमणंदिक्षुसर्वतः॥अस्माकंतुविनाक्वापिसंगमःस्वामिनासह॥८९॥शरीरस्याथवाया
तोहृयमेतदुभावहे॥ततस्तत्सकलंसैन्यंप्रेषयित्वायथागतं॥९०॥वयंबहुविधैर्मार्गैःसर्वेभ्रत्वापृथक्पृथक्॥त्वांविलोक

द॰कु॰
११

थितुं यावत्प्रयातोहं तन्निश्चयाः ॥९१॥ तावत्पुरातनमहासुकृतोदययोगतः ॥ ममत्वद्दर्शनं जातं चिरकालाभिकांक्षितं ॥९२॥ ते
नाद्य सफलं जन्म दिवसोद्यतनः शुभः ॥ अहाः सर्वेपि संजाता ममाद्यैव शुभावहाः ॥९३॥ अतः परमेतद्वृत्तांतमादिमध्यावसान
तः ॥ शृणु श्वावलितः स्वामिन्प्रोच्यमानं मया कृतं ॥९४॥ अकृत्वा तः मचलितस्त्वद्दिदृक्षयैव भुवं भ्रमन् ॥ ग्रीष्मेनितीक्ष्णतीक्ष्णांशुसं
ग्नतापोपतापितः ॥९५॥ मध्यान्हे नमतिं ध्यात्वा तिलच्छायामशिश्रियं ॥ तस्मिन्नेव क्षणे तस्मात्पुरुषो गिरिशृंगतः ॥९६॥ पतंतं
कंचिदालोक्य दोर्भ्यां विधृतवानहं ॥ मूर्छितं दूरपातेन कथंचित्समबोध्यतं ॥९७॥ निर्यंत्रं भृगुपातं किमकार्षीरित्युपाल
भ्ये ॥ ततो मया सविज्ञप्तः कस्त्वं कुत आगतः ॥९८॥ प्रोवाच मामहं राजहंसामात्यतनूद्भवः ॥ रत्नोद्भवोस्मि मत्पोतो निमग्नो
जलधौ कचित् ॥९९॥ आलंब्य फलकं दैवादहम—मतीतरं ॥ तत्रस्था गर्भिणी भार्या क्वगतामितलक्षिता ॥१००॥ ततोवनी
यं फलकात्कूलरूढः कस्यचिन्मुखात् ॥ मालवाधीशसंग्रामे मगधेशपलायनं ॥१॥ पितुः सर्वस्वनाशं च श्रुत्वाशोकार्णवे
विशं ॥ ततस्तं दुःसहं शोकमशक्तः सो—मप्यहं ॥२॥ महानद्यामहं गत्वा रेवायां विधिपूर्वकं ॥ स्नानादिकं विधिं कृत्वा बध्वा
गुर्वीं शिलां गले ॥३॥ आत्मानं सलिले गाधे यावत्क्षेप्तुमुद्यतः ॥ तावदूर्वानदीतीरस्थितादाश्रमसंनमात् ॥४॥ कश्चित्
सिद्धः समभ्येत्य तापसः करुणानिधिः ॥ हस्तदेशे गृहीत्वा मामितिपप्रच्छ सादरं ॥५॥ निर्निमित्तं माहसेस्मिन्महाशय
कृते मतिः ॥ आत्मघातस्य सकलं हत्यापं भवति दुस्तरं ॥६॥ तदाकर्ण्य मया प्रोक्तं मुने मद्वचनं शृणु ॥ नाहं मे सुमहद्दुःख
कारणं विद्यते विभो ॥७॥ यस्मात्कृतेन त्वात्मघातिपापलेशो पितो भवेत् ॥ इति मद्वचनं श्रुत्वा मामुवाच सुदुःखितः ॥८॥ यत्किं
चित्कारणं चित्ते विद्यते मद्ददस्व पि ॥ अज्ञानादात्मघातादि साहसं तात दुष्करं ॥९॥ तत्सर्वमुक्तं चैवं ते कथ्यं लोकानामग्रतः स्फुटं
ततो मयोक्तं स्वामिन्मेत्रसैव त्वं मनोत्हृदि ॥१०॥ अतस्त्वदग्रे मच्चित्तस्थितं वस्त्वामि कारणः ॥ आत्मघातस्य सकलं हत्सा
वधानोवधारय ॥११॥ राज्ञोस्ति राजहंसस्य मंत्री पद्मोद्भवाभिधः ॥ तस्य रत्नोद्भवो नाम तनयोहं महामुने ॥१२॥ वाणिज्याय ११

431/1995

गतो नौभिर्नानादेशांतरान्प्रति ॥ तत्रालभं धनं भूरि शुभामुद्वहे स्त्रियं ॥१३॥ अहं सर्वं गृहीत्वा तद्धनादिस्वभुजार्जितं ॥
यावत्प्रतिनिवृत्तोहं पोतस्थः स्वगृहान्प्रति ॥१४॥ तावद्वाहनभंगोभूत् मार्गा हे दैवयोगतः ॥ आयुःशेषतया किं चित्फलकं प्राप्य
सागरं ॥१५॥ तीर्त्वाहं तीरमगमं एक एव परं तु सा ॥ मम स्त्री गर्भिणी पोतभंगे क्वापि गतेत्यहं ॥१६॥ न जाने मित्ततो देशं स्व
कीयं प्रति गच्छता ॥ स्वामिनो राजहंसस्य मालवेशान्मयाश्रुतः ॥१७॥ भंगः स्वनाशश्च पितुर्मम सुदुःसहः ॥ अतोत्सह्यतया
दुःखादात्मघातं करोम्यहं ॥१८॥ मयेत्युक्तं समाकर्ण्य वृत्तांतं स मुनीश्वरः ॥ क्षणं ध्यानपरो भूत्वा तथ्यं मामब्रवीदिदं ॥१९॥
रत्नोद्भव हत्याकार्षीः साहसं लोकगर्हितं ॥ अचिरादेव ते स्वामी राजहंसः प्रतापवान् ॥२०॥ राजवाहननामानं संप्राप्य त
नयं शुभं ॥ भत्वा यासेन राज्यं स्वं सकलं समवाप्स्यति ॥२१॥ पिता तवापि तन्मंत्री सुखेस्थितो भविष्यति ॥ पोतमध्ये तवाभ्र
द्या पत्नी गर्भवती शुभा ॥२२॥ सापि धात्रीसमायुक्ता फलकं प्राप्य दैवतः ॥ जीवंती निःसृता पुत्रं —सविष्यत्यसंशयं ॥२३
तं च पुत्रं जातमात्रं वियुक्तं मातुरंतिकात् ॥ राजहंसस्त्वद्विभुरचिरात्समवाप्स्यति ॥२४॥ तस्य पुत्रस्य पत्न्याश्च त्वया सा
र्द्धं मसंशयं ॥ षोडशाब्दावधेरंते समायोगो भविष्यति ॥२५॥ ततः सर्वे पि ते यूयं भविष्यथ सुखान्विताः ॥ तद्वाक्यस्याति वि
श्वासात्षोडशाब्दाः कथं वत ॥२६॥ मया निवाहिता दुःखात्स्फरवावामि मनोरथैः ॥ अद्य ते समतिक्रांता मया दीना यतेवत तु ॥
२७॥ ततो दुःखादहं कुर्वन्भृगुपातं धृतस्त्वया ॥ नेत्युक्ते निजवृत्ते सकलेपि समाप्यतः ॥२८॥ स्वामिन्भ्रमायं जनक इति मे ति
श्चयो भवत् ॥ ततोहमपि रत्नेन धावद्धेतुं समुद्यतः ॥२९॥ तावदेवस्तु तं पार्श्वे कस्याश्चित्क्रंदितं स्त्रियाः ॥ तस्मिन्नेव क्षणे तत्र
यांचिद्दृद्याः स्त्रियाः ॥३०॥ मामुद्दिश्य समभ्येत्य वचः प्रोक्तं सगद्गदं ॥ वह्निप्रवेशं कुर्वाणा मत्कृता मातिदुःखिता ॥३१॥ निवा
रयतु तं चेत्य कोपि कारुणिकः पुमान् ॥ ततोहं तत्र गत्वा तां निवार्याग्निप्रवेशनात् ॥३२॥ अपृच्छं योषितं दृष्ट्वा तद्वृत्तांतम
दूषितः ॥ अथ सा कथयामास तद्वृत्तांतं समाप्यतः ॥३३॥ विप्रोत्थमितद्वृत्तांतं प्रोच्यमानं मयाः शृणु ॥ मगधाधीश्वरामात्य

द॰कु॰ पुत्रोरत्नोद्भवाभिधः॥३४॥पोतेनार्थार्जकः कालघटवाह्यपमार्गतः॥श्रेष्ठतः कालगुप्तस्य सुवृत्तां तत्र कन्यकां॥३५॥उद्वाह्य
१२ वहारेण बहुधर्मलब्धवानसौ॥दृष्टुं स्वपितरं तस्मिन्नुत्सार्य महार्णवे॥३६॥पोतेन विधिना भग्ने ययुः सर्वे विशीर्णतां॥सुवृत्ता
गर्भिणी तस्य पत्नी मायुप्मतीं तदा॥३७॥कंचित्फलकमालंब्य भाग्येनाहमुत्तारयं॥ततो मया भर्तृजन्मभूमिं प्रति शनैः शनैः॥३८
नीयमाना त्वहं धाडिवने सुतमसूत सा॥प्रसवव्यथया तस्यां लुठंत्यां पत्रसंस्तरे॥३९॥अटवेन नायांतं तनयं जातमात्रं सदंतिका
गृहीत्वा तेन सहिता पंथानं वीक्षितुं कचित्॥४०॥चतुःपथे स्थिता यावदेकाकिन्यतिदुःखिता॥तदानीमेव वन्येभो मम मोनिकमु
पाययौ॥४१॥तं वीक्ष्य मंदं दुद्राव बालं त्यक्त्वा भयादहं॥तत्राधावं जवाद्यत्र स्वस्तिकासा प्रसूतिजान्॥४२॥दुःखाद्रुदती मंदि
न्यां विजने तत्र कानने॥तत्र गत्वा समाश्वास्य तां कथं विदवादिषं॥४३॥वृत्तांतं सुतसंबंधिनं श्रुत्वा सा निदुःखिता॥पुनर्भुवंग
तान्हरिविलला प ततो मया॥४४॥शोचंकस्तनं भवति भवितव्ये बलीयसि॥किं विलापेन बहुना धैर्यमाधाय मानसे॥४५॥उ
त्तिष्ठ तत्र गच्छावो मया यत्राग्निते सुतः॥परित्यक्तो भयाद्दुष्टदंती बलसमुद्भवात्॥४६॥तच्छ्रुत्वोत्थाय सा हस्तं ममालंब्य श
नैः शनैः॥आगता तत्र नायश्य ज्ञातमात्रं निजं सुतं॥४७॥तत एषा निदुःखार्ता विरहात्पतिपुत्रयोः॥आत्मघातं तदा
शैर्यावत्कर्तुं समुद्यता॥४८॥तावद्देवीं समाभाष्य वागुवाचाशरीरिणी॥त्वमीदृक्साहसं बाले करोष्यद्य वृथैव यत्॥४९
तत्कारणमहं सर्वं वेद्मि ते हृदयस्थितं॥ननूनं विरमस्वास्मादात्मघातसमुद्यमात्॥५०॥अंते षोडशवर्षाणां पतिं पुत्रं त्वमा
प्स्यसि॥सरस्वत्याशरीरिण्या सहसा समुदीरितं॥५१॥श्रुत्वेति स्कंधयातुल्यं वचनं ज्ञाननिश्चया॥विरतेसमभ्यस- सा
सादतिदुःकरात्॥५२॥ततः सषोडशाब्दांतावधि रुक्स्तथा नया॥दिवसानां गणनया कथंचिदतिवाहितः॥५३॥न
थाप्यस्या न भवति संप्राप्तिः पतिपुत्रयोः॥अतः सा तु भृशक्लेशं दुःखं नहि रहोद्भवं॥५४॥वह्निप्रवेशं कुर्वाणा त्वया यद्विनिवा
रिता॥इतीयं कालगुप्तस्य श्रेष्ठिनस्तनया स्नुषा॥५५॥भार्यारत्नोद्भवस्यापि अहमस्या अथ धात्रिका॥इति तद्वचनं श्रुत्वा १२

some leaf must have been here omitted

493/1995

मन्ये नेयं मम अनघा॥५६॥इति निश्चित्य मनसि विचारं कृतवानहं॥एषा मिषेण केनापि समागच्छति मत्पितुः॥५७॥समीपं
प्रकरोम्यद्य तमुपायमसंशयं॥इति चित्ते विधायाहं भावो बंधाभिकां प्रति॥५८॥हे धात्रि यस्मात् तनुतं त्वयैनस्मात्समायनः
निःशंकमुक्तः कालेन तस्मादद्य नितिष्ठ मम॥५९॥एतामुद्दिश्य संजाता मम आलवचनं शृणु॥इतो नइ रत्नसिंध्योस्ति स्थितः क्षि
तेरारथः॥६०॥हस्तामलकवत्सर्वं स पश्यति तपोबलात्॥युवामागच्छतं तत्र मया सार्धमशंकितं॥६१॥तत्रागत्य निजं वृत्तं
श्रुतं तस्याग्रतोऽखिलं॥ततः स करुणासिंधुस्त्वाद्य तंक रिष्यति॥६२॥यथास्याः प्राणनाथस्य प्राप्तिः शीघ्रं भविष्यति॥इत्थं
द्रोप्यतां धात्र्या सहैव पितुरंतिकं॥६३॥स्थितस्याधस्तरोस्तस्य समानेषमहं मुदा॥पोतभंगादि कुतश्चित्प्रवेशांतं ततो मया॥६४
प्रणोदितावदधात्रीतद्वृत्तांतं तदयतः॥तच्छ्रुत्वा मत्पिता चित्ते निश्चिकाये निदर्शिनः॥६५॥असंशयं भवत्येव पत्नीयं मे पतिव्रता
ततः स पाणिना या तां ग्रहीतुं समुत्थितः॥६६॥तावत्परस्परस्पर्शभयात् सा प्राक्रामच्छनैः शनैः॥ततो मञ्जनकेनापि मनसे निश्चि
तं॥६७॥नूनं पतिव्रतेयं मां परं ज्ञात्वापसर्पति॥ततो मदीयं वृत्तांतं सर्वमावेदयाम्यहं॥६८॥अस्याः पुरस्ततश्चेयं ज्ञानवृत्ता
सती मयि॥विश्वासमतुलं प्राप्य मत्समीपं समेष्यति॥६९॥इति निश्चित्य मनसा वृत्तांतमखिलं निजं॥अचीकथत्पुरस्तस्या
मनसः प्रत्ययाय सः॥७०॥तच्छ्रुत्वाति प्रतीता सा निश्चित्य पतिमात्मनः॥प्रणम्य सहसा पादौ तस्यां तिकमुपाययौ॥७१॥ततः
स जनकः सावमानाभिनावुभावपि॥तत्रोपविष्टौ विरहान्मदीयादति दुःखितौ॥७२॥विलोक्य प्रणिपत्याहं तयोः पादावथाभ्र
वं॥आदिमध्यावसानांतं स्ववृत्तांतमशेषतः॥७३॥श्रुत्वेति तौ निजं पुत्रं मां विदित्वा समागतं॥समुत्थाय समालिंग्य परमां मुदमाग
तौ॥७४॥मिथः कथा बहुविधाश्चक्रतुः सुखसूचिकाः॥ततः प्रणम्य पितरौ मया प्रोक्तौ विनीतवत्॥७५॥मध्ये चनगरस्यास्य य
द्दील्लागृहमुत्तमं॥तत्र स्थानव्य मस्माभिः सर्वैरपि यथासुखं॥७६॥तथेत्यंगीकृतेनाभ्यां तस्मिन्पुरवरे महत्॥गृहमादायपि
तरौ तत्रानयमहं मुदा॥७७॥ततो मया पूर्ववमासीत्कुर्वता भ्रमणं भुवः॥प्राप्तं सिद्धांजनं सिद्धादेकस्मादतिनापसात्॥७८॥तत

द॰कु॰
१२

भावेणसंसाध्यनिधिमक्षयमक्लुतं॥वाणिज्यंविविधं कुर्वन्पितृभक्तिपरायणः॥७९॥पुरेस्मिन्व्यवहारेणवसामिविनयान्वितः॥
विदेशव्यवहारीतिकथयंतिचमांजनाः॥८०॥राजाम्रकृतयः सर्वाबंधुमांमानयंतिच॥धात्रीसुताराजपुत्र्याः सखीयाबालचंद्रि
का॥८१॥ममपित्रास्थितिस्तस्यामदत्तानुदिनेरमे॥कदाचिदनुजोराजमंत्रिणश्चंडवर्मणः॥८२॥दारुवर्माबलादेनामनयत्स्वगृ
हंनिशि॥निजस्वरूपमाच्छाद्यदासीचिह्नानिधारयन्॥८३॥तयैवप्रिययासाकंप्रगच्छंतस्यमंदिरं॥तंतदालिंगनोद्युक्तमह
मेकांतसद्मनि॥८४॥अस्त्रराशिसवलंकंठदेशेशृ—न्मारयं॥ततोनिःकंटकंतस्यांयथाभिल—तंसुखं॥८५॥संदेवानु
भवंप्रीत्यादिनानिगमयाम्यहं॥परंभवद्वियोगोत्थदुःखादत्यर्थदुःसहात्॥८६॥सर्वदाल्हादलमिवमनसिप्रतिभा
तिमे॥पित्रोःसंयोगमारभ्ययावदद्यदिनंमया॥८७॥तयोरेवानुरोधेनलोकमार्गमजानतोः॥विहितावस्थितिर्गेहेनलो
भात्स्वसंततान्॥८८॥एतावद्भिर्दिनैर्दृष्टिर्नतयोराजीवनक्षमा॥कृत्वावाणिज्यमार्गेणतद्बिंतारहितोभवं॥८९॥
ततोमायासहासात्मेकदापितरंप्रति॥प्रावोचमत्रकुरुतवाणिज्यंयूयमन्वहं॥९०॥अहंतुस्वामिनंराजवाहनंसमुदीक्षि
तुं॥भूमंडलंभ्रमिष्यामिनित्यंतत्संगमावधि॥९१॥इत्युक्त्वाद्यैवसुदिनेज्ञात्वादैवज्ञवाक्यतः॥पितुराज्ञांसमासाद्यजन
न्याकृतमंगलः॥९२॥यावत्प्रचलितस्तावच्छकुनानांपरंपरा॥तत्कालफलदामार्गेप्रादुरासीत्पदेपदे॥९३॥ततस्त
त्फलसंप्राप्तिंप्रतीक्षमाणस्यशाश्वतः॥आयायामास्थितोयावत्तावद्भाग्योदयादहं॥९४॥अद्राक्षंस्वामिनमतःफलितास्ते
मनोरथाः॥अतःपरंशीघ्रमस्यनगरस्यप्रवेशनं॥९५॥कृत्वामुहूर्तेमत्तनिसमागच्छस्वसद्मनि॥तत्रस्थिताःपुरेपांतेसेव
कानांसमागमे॥९६॥तथायत्नंविधास्यामोयथास्याच्छीघ्रमेवसः॥इतिश्रुत्वासमुत्थायसार्धंपुष्पोद्भवेनसः॥९७॥प्रविश्यो
ज्जयिनींरम्यांतद्गृहेसमुपागमत्॥उत्कंसपुष्पोद्भवमंदिरांतर्वसन्स्वकेनात्मनिगूहनाय॥तस्मिन्पुरेविप्रमिषाच्चचारसंत्रौ
षधिमंत्रकलादिविज्ञः॥९८॥ ॥इतिमहाराजाधिराजश्रीगोपीनाथसंशोधितेदशकुमारकथानकेपुष्पोद्भवचरितंनाम १२

द्वितीयउच्छ्वासः॥२॥ ॥अन्यदामालवेंद्रस्यतनयाराजवाहनः॥उज्जयिन्यांवसन्नित्यंकौतुकंद्रष्टुमागतं॥१॥यात्रोत्सवेम
हाकाल्यादर्शावंतिसुंदरी॥साप्यपांगवलद्दृष्ट्याप्रीत्यानंस्मरनःशरैः॥२॥ततःसागततनयास्वसखींबालचंद्रिकां॥३॥पप्रच्छ
सखिजानासिकोयंकंदर्पकांतिजित्॥अथाकरोद्द्विवारंसाविनाकांतेनचेतसा॥४॥पुष्पोद्भवेनभर्त्राहंरहसीतिनिवारिता॥रा
जवाहनवृत्तांतंप्रियेजानामितत्वतः॥५॥परंत्वयानकस्यापिकथनीयमसंशयं॥इयंचमेप्राणसमावयस्यावंतिसुंदरी॥६॥
राजवाहनमुद्दिश्यसरागमितिपृच्छति॥ततोविमृश्यसुचिरंकुमारेराजवाहने॥७॥तस्याहृत्स्थानुरागंसासंजातदृढनिश्चया॥
सर्वादपरमंगुह्यंनवाच्यंकस्यचित्त्वया॥८॥इतिस्फुलाहृढनरंध्रपथैरतिदारुणैः॥कथयामाससख्याःसाकर्णमूलेशनैः
शनैः॥९॥वयस्यैराजहंसस्यराज्ञोयंराजवाहनः॥सुतःसर्वगुणैर्युक्तःपुष्पोद्भवगृहेवसन्॥१०॥निगूढोविचरत्यस्यांपुरि
केनापिदेनुना॥इत्येवंतेनिगदितंनामाद्यस्यततःपरं॥११॥राजवाहनसंसक्तहृदयावंतिसुंदरी॥गत्वागर्भगृहंकाल्याइमा
मार्यामवोचत॥१२॥राजाईरचितमौलेत्वत्पदराजीवसेवयाम्बद्य॥राजितसुगुणंरमणंराजसमंराजवाहनंदेहि॥१३॥
इतिदेवींनमस्कृत्यनिर्गतासाकुमारिका॥विलासिनीसहस्रौघैर्वृताकन्यापुरंययौ॥१४॥कुमारोपिनमस्कृत्यदेवींपुष्पो
द्भवान्वितः॥यावद्बहिर्विनिःसृत्यप्रासादद्वारितिष्ठति॥१५॥तावद्यात्रोत्सवायातजनतामध्यतःपुमान्॥निःसृतःसह
साकश्चिदभ्येत्यप्रणनामतं॥१६॥तमुत्थाप्यततोदृष्ट्वासोमदत्तंसमागतं॥मध्येचवानांबंधूनांकुमारःपरिषस्वजे॥१७॥त
तोनिकटस्थंप्रावाचप्रभुःपुष्पोद्भवंप्रति॥दिष्ट्यापुष्पोद्भवायंतेभ्रातायन्मिलितश्चिरात्॥१८॥सोमदत्ताभिधस्तस्माद्दि
धेहिपरिरंभणं॥आलिलिंगाथपरयाप्रीत्यापुष्पोद्भवोपितं॥१९॥ततःसर्वेपितेगत्वाप्रदेशेक्वापिनिर्जने॥उपविश्यकथाश्च
क्रुःप्रमोदेननिजानिजाः॥२०॥तत्रादौराजतनयःस्वस्यपुष्पोद्भवस्यच॥वृत्तांतमुक्त्वापप्रच्छसोमदत्तंनिजांकथां॥२१॥सोम
दत्तस्ततःसर्वस्ववृत्तांतमभाषत॥देवद्विजोपकारायसुरालयविलंत्वयि॥२२॥तदाप्रविष्टेमित्रौघेत्वदन्वेषणतत्परे॥अ

935
1995

र॰कु॰
१४

दंनत्वांसमर्मनेष्टुंनर्दींसंतीर्यनर्मदां॥२३॥गछन्कापिस्फुरद्रुक्मिमप्यदुःखमध्वनि॥ननदायवनेभ्रयोऽव्रजन्मध्यंदिनेसति॥२४
आनपोहंजिनोदंवगृहेकंचिदुपाविशं॥अथकोप्यागतोविप्रःश्रोत्रियोमामयाचत॥२५॥अकिंचनायमत्किंचिद्देहिसुस्थीडि
तामये॥इत्थमर्थ्यमानोयतद्रत्नमददामहं॥२६॥तत्समादायवटुर्धादत्ताशीरात्मगेहंव्रजत्॥एवंसतितमस्विन्यांत
स्यामेवमहीपते॥२७॥मत्तकालस्यमृगयांकुर्वतोविंध्यकानने॥चौर्यंममभवद्रत्नंरत्नोरक्षाधिकारिणः॥२८॥विनिर्ग
ताःपदंनीत्वानद्विलोकयितुंजनाः॥तंविलोक्यद्विजंतेनसुपागछंतमध्वनः॥२९॥यावद्दूरीतापश्यंतितावद्रत्नंददंतिके॥ह
ष्टैस्तैस्तस्करंज्ञात्वाततोऽव समुद्यताः॥३०॥तेनहाधायपश्चात्सविप्रःप्रोवाचतान्प्रति॥भवंतोमांकिमित्येवंमारयंतिनिरा
गसं॥३१॥मह्यंरत्नमिदंयेनदत्तंतंदर्शयाम्यहं॥इत्युक्त्वासस्समागम्यतैःसार्द्धंमार्गेज्ञातुमध्यात्॥३२॥सुपर्वसदनेसुम
मदर्शयतमांद्विजः॥प्रत्ययद्दोषमेतेनवितीर्णंरत्नमन्यथा॥३३॥नापराधंमयाकिंचिदित्यवादीसतद्विजः॥ततस्तेदं
परद्दिनंद्विजन्मानंविमुच्यमां॥३४॥गृहीत्वासुदृढंबंधैर्बध्वावचनमब्रुवन्॥रेचौरदर्शयास्मुत्वंविभिराज्ञोत्तरेणत्वया॥३५
नोचेद्रूपंवधिष्यामःसांप्रतंत्वांसितायुधैः॥श्रुत्वेतिक्रूरसुदितंतेषांतानभ्यधामहं॥३६॥पथिकःकोप्यहंपुर्यामस्यामि
त्रामुखंतोषितः॥प्रातःप्रचलितोमार्गेविस्फुरन्निजरश्मिभिः॥३७॥इदंपतितमद्राक्षंरत्नंतेनेदमग्रहंपरं॥तन्नास्मैयाचमाना
यब्राह्मणायमयार्थिने॥३८॥इत्युक्तेकुपितास्तेमांनीत्वाकारागृहेक्षिपन्॥यत्राहंरक्षितस्तत्रत्रष्टैःखलाभिर्नियंत्रिताः॥३९
केचनान्येपिपुरुषाःसागसःसंतिरक्षिताः॥मयेतिमष्टास्तेसर्वेपृथ्वंकारागृहेप्रभोः॥४०॥किमितीच्छंनिगडितावदध्वंस्वंस्व
लादिभिः॥तेषामध्यात्ततःकेचिदितिप्रोचुःसमंखलाः॥४१॥लाटोपमत्तकालोस्मत्स्वामिनावीरकेतुना॥विगृह्णन्सेनया
भ्येत्यपाटलीपुरमावृणोत्॥४२॥वीरकेतुर्भयात्तस्यस्वकन्यांवामलोचनां॥मंत्रिणंमानपालंचससैन्यसुसंपदां॥४३
आदायोपायनंसर्वंवीरकेतुःसमर्पितं॥जयीस्वंपुरमुद्दिश्यमत्तकालोन्यवर्तत॥४४॥ततोस्मानतिविश्वासादीदृक्कार्य १४

437/1995

करान्सदा॥वीरकेतुःसमाहूयप्रयुक्तवानुवाचप्रभुः॥४५॥युष्माभिर्ममकार्याणिदुष्कराणिबहून्यपि॥ईदृग्विधानिबहुधारू
तान्याज्ञापयाम्यतः॥४६॥यावच्चतुरस्यंमत्तकालोलाटाधिपःक्रूरं॥मत्सन्तायानगृह्णातितावद्युयमतंद्रिताः॥४७॥सर्वथा
रक्षणीयेस्वदेहव्यास्त्वापराङ्मुखाः॥रात्रौदिनेप्रसुप्तस्यस्थितस्यचलतोपिवा॥४८॥कुरुध्वंतथमेतस्यस्यादुत्कर्षस्ततोम
म॥तद्वाक्यमुररीकृत्यवयंसर्वेसुनिश्चिताः॥४९॥तदेवविभुमानम्यस्कंधावारंमहीपते॥मत्तकालस्यविविशुःकृतवेषविपर्यया
५०॥ततस्तत्रस्थितंमानपालमभ्येत्यमंत्रिणं॥विनिवेद्यात्मवृत्तांतंकार्यसाधनतत्पराः॥५१॥तस्मिन्सैन्येसुनिभृतंस्थिताः
सर्वेपृथक्पृथक्॥ततःसभूपतिःसैन्यसहितोविंध्यकानने॥५२॥समागतःसमाहूयमानपालंनिजोऽब्रवीत्॥इत्युक्त्वातेनस
कन्यामानपालस्यमंत्रिणः॥५३॥अभिमानादशंकेनरक्षणायसमर्पिता॥नृपोयंनगरंगत्वाकरिष्यतिकरग्रहं॥५४॥कन्य
कायाइतिश्रुत्वाहर्षोस्माकंमहानभूत्॥विधास्यामोनिजंकार्यंतद्दिनावधिनाध्रुवं॥५५॥ततोद्वित्रैर्दिनैर्विंध्यवनंप्राप्यसभू
पतिः॥नयत्रामाप्रमत्तःसन्रमतिस्मेत्यकरोदभीः॥५६॥पंचषाणिदिनान्यत्रवनेस्थित्वाकरोम्यहं॥मृगयांमृगयाशीलैः
प्रमत्तैःपुरुषैःसह॥५७॥ततःप्रातर्विनिर्गत्यतपनास्तमनावधि॥भ्रांत्वाविंध्यवनेतस्मिन्मृगव्यापारसेनयाः॥५८॥
निवेशेनिजसेनायाःसंध्यायांसमुपागतः॥विधायव्यवहारायद्विज्ञोनेवसनंवेश्मनि॥५९॥वयंचसर्वेसकलांरजनीनिद्रया
विना॥प्रतीक्षमाणास्तत्रैवतिष्टामस्तद्वधंनरं॥६०॥परंतुनृपतेर्निद्रागृहस्यपरितःस्थितैः॥जागुरूकैर्नरैरक्षाधिकृतैर्न
लभामहे॥६१॥प्रवेशंपटवेश्मांतर्यत्रशेतेसभूपतिः॥अथैकदामृगयायामजानंतोनिशामुखे॥६२॥प्रयातंतंनृपोरात्रौ
विरल्लानवीक्ष्यरक्षिणः॥मिथःसंभूयसर्वेपिवयंकुर्मोविनिश्चयं॥६३॥प्रविश्यपटवेश्मांतर्निहत्यवसुधाधिपं॥अद्यनिर्या
तयिष्यामःस्वामिनोनःपराभवं॥६४॥ततःसुरंगयाभ्येत्यनिद्रावेश्मावनीपतेः॥तत्रयावत्प्रपश्यामस्तावत्तत्रशयनेनृपः॥६५
प्रछन्नस्त्वाप्रमितान्समादायानुयायिनः॥प्रयातोरात्रिस्तगवाविहारायानिकौतुकान्॥६६॥ततस्तत्रछयनस्थानिमृष

पानिमहीपतेः॥ स्फुरन्महार्हमणिभिः खचिता निबद्धा निच॥ नानि सर्वाण्युपादाय निर्गन्तुं न हृहाढ्दिः॥ तावत्तत्पूर्वसमये द्योतः
प्रादुरभूत्पुरः॥ ६९॥ ततो निर्गच्छतां वेगाद्धारेणैव ससंभ्रमं॥ अस्माकं पदविन्यासशब्देन सहसोत्थिताः॥ ६९॥ मध्यस्थारक्षिणः स
र्वे चौराश्चौरा इति वादिनः॥ अस्मानन्वयुः शीघ्रं पलायनपरायणान्॥ ७०॥ ततस्तेभ्यः सीमभूमिं समागत्य पदे पदे॥ गृहीत्वा सहसैव
स्मान्नीत्वैकस्य तरोरधः॥ ७१॥ अस्मत्समीपवर्तीनि मुष्टान्याभरणानि च॥ परीक्ष्यैकैकशो यावत् गृह्णन्ति निखिलान्यपि॥ ७२
तावदेकं महामूल्यं मध्यनायकसंज्ञितं॥ रत्नोत्तमं न पश्यन्ति कस्मिंश्चिद्भूषणोत्तमे॥ ७४॥ ततः प्रकारैर्विविधैरस्मान्सप्रपच्छुराद
